॥कुवलयानंदप्रारंभः पत्रं॥ ६९

श्रीगणेशायनमः॥अमरीकबरीभारभ्रमरीमुखरीकृतं॥हरीकरोतुदुरितंगौरीचरणपंकजं॥१॥परस्परतपःसं
पक्कलापितपरस्परौ॥प्रपंचमातापितरौश्रीचोजाप्पतीक्लृपः॥२॥उद्घाघयोगकलयाहृद्याऽलंकारां
धन्योऽप्पयदीक्षितोयथाहविरचयमाणःयःप्रस्फुरत्यविरतंपरिपूर्णरूपःश्रेयःसमेदिशतुचंद्रज्योतिरंकमुकुंदः॥३॥
अलंकारेषुबालानामवगाहनसिद्धये॥ललितःक्रियतेतेषांलक्ष्यलक्षणसंग्रहः॥४॥येषांचंद्रालोके
दृश्यंतेलक्ष्यलक्षणश्लोकाः॥प्रायस्तएवतेषामितरेषामभिनवाविरच्यंते॥५॥उपमेयत्रसादृश्यलक्ष्मी
ह्लुसतिद्वयोः॥हंसीवकुछतेकीर्तिःस्वर्गंगामवगाहते॥यशोपमानोपत्रेयोःसहृदयहृद्याद्भा
दित्वेनवाहसादृश्यमुद्भूततयालसतिव्यंग्यमर्यादेविनास्पष्टंचकाशतेतत्रोपमालंकारः।हंसीवेत्युदा
हरणं॥इयंचपूर्णोपमेत्युच्यते॥हंसीकीर्तिःस्वर्गंगावगाहनमिवत्रद्भ्वेत्येतेषामुपमानोपमेयसा
साधारणधर्मोपमावाचकानांचतुर्णामप्युपादानात्॥यथावा॥कुणदोषौगुणीकृत्यद्वावेवाविशेषवि
शेषाभ्यांघतेपूर्वंपरंकंठेनियच्छति॥अत्रत्रयाणामुपमानोपमेययोर्नैकःसाधारणोधर्मःउपमानेईश्वरेचंद्रगा ॥१॥

योर्ग्रहणमुपादानंतयोर्मध्येपूर्वस्यचंद्रस्यशिरसाश्लाघनंशिरसावहनंउत्तरस्यगरलस्यकंठेनिय
मनंस्थापनं॥उपमेयेबुधेगुणदोषयोर्ग्रहणंहानंतयोर्मध्येपूर्वस्यगुणस्यशिरसाश्लाघनंशिरः कं
पेनाभिनंदनंउत्तरस्यदोषस्यकंठेनियमनंकंठकंपादुपरिवाचकद्वारेभिदात्॥तथापिचंद्रगरल
योर्गुणदोषयोश्चबिंबप्रतिबिंबभावेनाभेदादुपादानज्ञानादीनांगद्वारत्वाद्यकस्योपादानेनाभेदा
ध्यवसायाच्चसाधारणधर्मतेतिसर्वस्माद्विशेषः।वस्तुतोमित्रयोरप्युपमानोपमेयधर्मयोःपर
स्परसादृश्यादभित्रयोःपृथगुपादानंबिंबप्रतिबिंबभावद्वयालंकारिकसमयः।वर्ण्योपमानध
र्मणामुपमावाचकस्यचैकदाचिदुपादानेभिन्नालुप्तोपमाष्टधा।तडित्तेरीदृक्तुल्यास्याकर्पूरं
तीदृशोमम।कांत्यास्मरवधूर्येतीदृग्तन्वीरोमयाप्यत्रयामेलनंतत्रलाभोमेयश्चतद्वतेः।तद्
तत्काकतालीयमधितर्कितसंभवं॥उपमेयादीनांचतुर्णामध्येरूपस्यद्वयोस्त्रयाणांवाप्रतिपादा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

कत्वाद्भावेनलुप्तोवमेत्यर्थः॥साचाष्टधा।यथा॥वाचकलुप्ता।धर्मलुप्ताधर्मवाचकलुप्ता॥वाचकोपमेयलुप्ता॥वाचकोपमेयलुप्ता॥उपमानलुप्ता॥वाचकोपमानलुप्ता॥धर्मोपमानलुप्ता॥धर्मोपमानवाचकलुप्तेति॥तत्रोपमानलोपरहितास्त्यत्यादिश्लोकेनदर्शिताः॥तद्भेदाउत्तरश्लोकेन॥तडिद्गौरीत्यत्रवाचकलोपः॥तडिद्विगौरीत्यर्थेउपमानानिसामान्यवचनैरितिसमासविधायकशास्त्रकृतः॥रंभोरुत्यास्यत्यत्रधर्मलोपस्त्वौचित्यकः॥नशास्त्रकृतःकांतारंभोरुत्यास्यत्यधिवक्षुंशक्यत्वात्।कर्पूरंतीत्यत्रधर्मवाचकलोपःकर्पूरमिवाचरंतीत्यर्थेविहितस्यकर्पूरवदनंदात्मकाचाराद्यर्थस्यक्विप्प्रत्ययस्यक्विप्प्रत्ययेनसहलोपात्॥अत्रधर्मलोपेऽप्यौचित्यकृतनयनयोरानंदात्मकतयाकर्पूरंतीतितदुपादानस्यापिसंभवात्॥इतिकश्चित्पाठः॥कांत्यास्मरंधूयंतीत्यत्रवाचकोपमेयलोपः॥अत्रकांत्येतिविशेषणसामर्थ्यात्स्वात्मानंस्वमेवधूमिवाचरंतीत्यर्थस्यगम्यमानतयास्वात्मनउपमेयस्यसहोपमावाचकेनानुपादानात्।सत्यौचित्यकः स्वात्मानंस्मरंधूयंती

त्युपमेयोपादानस्यापिसंभवात्।काकतालीयेत्यत्रकाकतालशब्दोनिमित्तविषयेकाकतालसमवेतक्रियाविशिष्टोतेनकाकागमनमिवतालपतनमिवकाकतालमितीवार्थेसमासाच्चतद्धितेषयादितिह्यर्थकात्समासः उभयत्रोपमेयंचस्यस्यकश्चिद्भनंतत्रैवरहसितन्यायावस्थानंचतेनचस्यतन्यायस्यसमागमः काकतालसमागमसदृशदृष्टिफलतोतितः काकतालमिवकाकतालीयमितिद्वितीयस्मिन्निवार्थेसमासाच्चतद्धितेषयादितिसूत्रेणस्वेप्रतिकृतावित्यधिकारस्थेनछप्रत्ययः।तथावपतनदलितंतालफलंयथाकाकेनोपभुक्तंवरोदर्शनक्षमितहृदयातन्वीस्वेनोपभुक्तंतिरितेर्थः॥तत्तस्यात्रकागमनतालपतनसमागमरूपस्यकाककृततालफलोपभोगरूपस्यचोपमानस्यानुपादानात्प्रत्ययार्थोपमायामुपमानलोपः।समासार्थोपमायांवाचकोपमानलोपः।सर्वत्रयंलोपःछप्रत्ययविधायकशास्त्रकृतः॥अत्रितार्थकृतसंभवमितिसाधारणधर्मस्यानुपादानेप्रत्ययार्थेयमायांधर्मोपमानलोपः।समासार्थेपमायांधर्मोपमानवाचकलोपइतिसूक्ष्मदृशावधार्यं।एतेषामुदाहरणांतराणिविस्तरभयान्नालिख्यंते॥॥उपमानोपमेयत्वंयदेकस्यैव

वस्तुनः। इंदुरिंदुरिवश्रीमानित्यादौतदन्वयः। एकस्यैववस्तुनउपमानोपमेयत्ववर्णनमनन्वयः। वर्ण्य-
मानमपिस्वेनसाधर्म्येणान्येतीतिद्युपपत्तेः। अनन्वयिनोपदार्थस्याभिधानंसदृशांतरव्यवच्छेदनाउ-
पमाद्योतनाय। इंदुरिंदुरिवश्रीमानित्यत्रश्रीमत्वेचंद्रस्यनान्यः सदृशोस्तीति सदृशांतरव्यवछेदो
लभ्यते। ततश्चस्वेनापिसादृश्यासंभवादुपमेयेपर्यवसानं॥ यथावा। गगनंगगनाकारंसागरः
सागरोपमः। रामरावणयोर्युद्धंरामरावणयोरिव। पूर्वोदाहरणेश्रीमत्त्वधर्मस्योपादानमस्तिइह
तुगगनादिषुवैपुल्यादेर्धर्मस्योपादाननास्तीतिविशेषः॥ पर्यायेणद्वयोस्तेचोपमेयोपमामता। धर्मो
र्थइवपूर्णश्रीरर्थोधर्मइवत्वयि। द्वयोः पर्यायेणोपमानोपमेयत्वकल्पनंतृतीयसादृश्यव्यवछे
दार्थं॥ धर्मार्थयोर्हिकस्यचित्केनचित्सदृश्यवर्णितस्याप्यनेनसादृश्यमर्थसिद्धमपिपुन-
र्वर्ण्यमानंतृतीयसादृश्यव्यवछेदफलंभवति। यथावा॥ स्वामिवजलंजलमिवखंहंसइवचंद्रश्चं
द्रइवहंसः। कुमुदाकारास्ताराताराकाराणिकुमुदानि। पूर्वत्रपूर्णश्रीरितिधर्मउपात्तः इहतुनिर्म

MEMORIAL

लत्वादिधर्मोनोपात्तइभेदः। उदाहरणद्वयेपिप्रकृतयोरेवोपमानोपमेयत्वकल्पनंराशिधर्मार्थसमृद्धेः शरदि ग
गनसलिलादिनैर्मल्यस्यचवर्णनीयत्वात्। प्रकृताप्रकृतयोरयंषासंभवति। यथागिरिरिवगजराजोयं
गजराजइवोच्चैर्विभातिगिरिः। निर्झरइवमदधारामदधारेवास्यनिर्झरः स्रवति। प्रतीयमुपमानयो
पमेयत्वप्रकल्पनं। त्वल्लोचनसंपर्धेत्वद्वक्त्रसदृशोविधुः। प्रसिद्ध्योयमानोयमेयत्वप्रतिलोम्यात्प्र
तीयं॥ यथावा। यत्रत्रसमानकांतिसलिलेमग्नंतदिंदीवरंमत्वैरंतरितःप्रियेतवमुखच्छायानुकारीशशी
येपिचद्मनानुकारिगतयस्तेराजहंसागतास्त्वत्सादृश्यविनोदमात्रमपिमेदैवेननक्षम्यंते॥ अन्योपमेय
लाभेनवर्ण्यस्यानादरश्चतत्। अलंगर्वेणतेबक्त्रकांत्याचंद्रोपिनादृशः। स्वत्प्रभुत्वगुणतयावर्ण्यमानस्यो
न्यत्रसंसादृश्यमसहमानस्योपमेयंकिंचिदन्यंतावतास्यांतरस्कारोद्वितीयंप्रतीयं। पूर्वस्मादपिविशे
षस्तुविशेषालंकृतिः॥ यथावा॥ गर्वमंसंभाव्यमिमंलोचनयुगलेनकिंवहसिभद्रे। संतीदृशानिदृशांदृशिसरः सु
ननुनीलनलिनानि॥ वरंयोपमेयलाभेनतथान्यथानादरः॥ कः कौर्यदर्पस्तेमृत्योत्वत्तुल्याः संतिहिस्त्रियः॥

अत्यन्तोत्कृष्टगुणतयाकविदप्युपमानभावमसहमानस्यावर्ण्यस्यवर्ण्यमुपमेयंपरिकल्प्यतावतातस्यतिरस्कारःपू
र्वेप्रतीपवैपरीत्येनतृतीयं।यथावा।अहमेवगुरुःसुदारुणानामितिहालाहलमास्मतादृशः।ननुसंति
भवादृशानिभूयाभुवनेस्मिन्वचनानिदुर्ज्जनानां।वर्ण्यनान्यस्योपमायात्रनिष्पन्नवत्स्थतत्।मुधायवा
दीमुग्धाक्षिखन्मुभंकिलंबुजं।अवर्ण्यवर्ण्योपमित्यनिष्पन्नवचनंपूर्वेभ्यउत्कर्षशालिचतुर्थंप्रतीयंतुदा
हरणेमुधापदात्लोक्याउपमित्यष्पन्नित्तिरूहाटिता॥यथावा।आकर्णयसरोजाक्षिवचनीयमिदंमुवि
नाशांकस्तवत्रक्रेणयामेरेहयमीयते॰प्रतीपमुपमानस्यकेमर्थ्यमपिमन्यते।दृष्टंवेदृङ्नंतस्याःकिं
पद्मेनकिमिंदुना॥उपमेयस्यैवोपमानप्रयोजनंधूर्वलेनउपमानकेमर्थ्यमितिकश्चिदाहः।उपमा
नप्रातिलोम्यात्संचमंप्रतीयं॥यथावा॥तदोजसस्तद्यशसःस्थितावितोवृथेतिविद्वेकुहतेयदापदा॥त
नोतिभानोःपरिवेषकैतवात्तदाविधिःकुंडलनांविधोरपि॥केचिदनन्वयोपमेयोपमाप्रतीयानामुपमा
विशेषत्वेनतदंतर्भावंमन्यंते।अन्येतुपंचमंप्रतीयप्रकारमुपमानाक्षेपरूपत्वादाक्षेपालंकारमाहुः।विष

यभेदनाद्रूपरंजनंविषयस्यमत।रूपकंतुत्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः।अयंहिधूर्जटिःसाक्षा
द्येनदग्धाःपुरःक्षणात्।अयमास्यविनाशंभुस्तानद्रीकंविलोचनं।शंभुर्विश्वमवत्यद्रीकृत्यसम
दृष्टितां।अस्यमुखेंदुनालक्ष्येनेत्रानंदेकिमिंदुना।साधीयमपरालक्ष्मीरमृधासागरोदिता॥अयंकलं
किनश्चंद्रान्मुखचंद्रोतिरिच्यते।विषयस्तूपमेयंवर्णनीयंमुखादि।विषयिणो
रूपेणविषयस्यरंजनरूपकं॥अन्यरूपेणरूपवतःकरणात्तानन्वयेकश्चित्प्रसिद्धविषयभेदपर्यवसितं।के
चित्भेदप्रतीयमानएवतदीयधर्मारोपमात्रपर्य्यवसितं।ततश्चरूपकंत्रिवत्।द्विविधं।अभेदरूपकात्
यरूपकमिति।द्विविधमपित्रयेकंत्रिविधंप्रसिद्धविषयाधिक्यवर्णनेनतन्यूनत्ववर्णनेनअनुभयो
क्त्यावेतिरूपकंषड्विधं।अयंहीत्यादिसार्द्धश्लोकेनाभेदरूपकाणि।अस्यमुखेंदुनेत्यादिसार्धश्लोकेनता
दृप्यरूपकाणिचआधिक्यन्यूनत्वानुभयोक्त्युदाहरणक्रमेणातिलोम्येनोदाहृतानित्येनदग्धाइतिविशेषणेन
वर्णनीयेराशिप्रसिद्धिरीत्याभेदानुरंजनाच्छिवस्यपूर्वावस्थातोवर्णनीयराजेभावावस्थापान्यूनत्वाभिधानेचार

वर्णनाच्चानुभयाभेदरूपकमाद्यं॥ततीयलोचनप्रहारेणोक्तापूर्वावस्थातोन्यूनताप्रदर्शनाच्चूनाभेदरूपकं द्वितीयं॥न्यूनत्ववर्णनमथभेदाधीपादकत्वाच्चमत्कारकारि॥विषमदृष्टिपरित्यागेनजगद्रक्षकत्वोक्त्याशिवस्य पूर्वावस्थातोवर्णनीयराजभावावस्थायामुत्कर्षविभावनादधिकाभेदरूपकं तृतीयं॥एवमुत्तरेषुताद्रूप्यरूपकोदाहरणेष्वपिक्रमेणानुभयन्यूनाधिकभावाउन्नेयाः॥अनेनैवक्रमेणोदाहरणांतराणिचंद्रज्योत्स्नाविशदपुलिनेसैकतेस्मिन्सरय्वादधृतंविरतरमभ्रसिद्धयेनाःकयोश्चित्॥एकोवक्ति प्रथमतिहतंकेटभंकंसमन्यस्त्वंकथयभवताकोहनस्तत्रपूर्वम्॥३०॥अत्रसत्वमित्यनेनयःकंसकैटभयोर्हन्तागरुद्ध्वजः तत्रादात्म्यवर्णनीयस्यराज्ञःप्रतिपाद्यंप्रतिकंसकैटभयोर्वधयोर्वापर्यप्रश्नव्याजेनतत्रादात्म्यदृढीकरणात्पूर्वावस्थातउत्कर्षायकर्षयोरविभावनाच्चानुभयाभेदरूपकंविधाद्वैधाभ्रमंचक्रेकांतासुकनकेपुचातासुतेधन्यनासक्रःसाक्षाद्गोनराकृतिः॥३१॥अत्रसाक्षादितिविशेषणेनविरक्तस्यप्रसिद्धशिवतादात्म्यमुपदिश्यनराकृतिरितिद्वितीयमूर्तिविकल्पप्रतिपादनान्यूनाभेदरूपकं॥त्यागेतत्किमितिकांतधर्मिकसत्त्वकधर्मिकचरूपंविधाद्वयंश्रमंजलदनिष्टानुबंधिसुखसाधनत्वरूपं२

वेपतेयसिंधुस्त्वंसेतुमंथक्रतःकिमसौविभेति॥द्वीपांतरेपिनहितेस्यवशंवदोयत्नोराजपुंगवनिषेवत एवलक्ष्मीः॥३२॥अत्रत्वंसेतुमंथक्रदितिसेतोरमृतमंथनस्यचकर्तृपुरुषोत्तमेनवर्णनीयस्यतादात्म्यमुक्त्वा तथापित्वदागमनंसेतुबंधनायमंथनायवेतिसमुद्रेणनभूतयेद्वीपांतराणामपित्वद्भुजवद्रत्नेनपूर्ववद्वद्वीपांतरजेतव्याभावात्प्राप्तलक्ष्मीकत्वेनमंथनप्रसक्त्यभावाच्चेतिपूर्वावस्थातउत्कर्षविभावनात्किंचिदधिकाभेदरूपकं॥किंपद्मस्यरुचिंहरन्तिनयनानंदंविधत्तेनकिंवृद्धिंवाप्यकेतनस्यकुरुतेनालोकमात्रेणकिं॥ वक्त्रेंदोतवसत्त्वयंयदपरःशीतांशुरुज्जृंभतेतदर्पःस्यादमृतेनवर्द्धितस्यस्वविबाधरे॥३३॥अत्रापरः शीतांशुरित्यनेनवक्त्रेंदोःप्रसिद्धचंद्रादुत्कर्षाभिधित्सयातस्यप्रसिद्धचंद्रकार्यकारित्वमात्रप्रतिपादनेनउत्कर्षायकर्षयोरप्रदर्शनात्ताद्रूप्यरूपकं॥अथचतुर्दशोऽत्रलाटिवाहुरपरोहरिः॥अभाललोचनः शंभुर्भगवान्बादरायणः॥३४॥अत्रहिब्रह्मादावपरहरिविशेषणात्त्रिमूर्तिताद्रूप्यमात्रविवक्षायांभिन्नाश्चतुर्दशब्रह्मादिवैकल्प्येचोक्तमितिन्यूनताद्रूप्यरूपकं॥इदंविशेषोक्त्युदाहरणमितिवामनमतं॥यदाहरुद्रट

हानोऽन्यगुणसाम्यदर्थविशेषोक्तिरिति॥ किमसृभिर्लिप्तैर्जडमन्यसमपिनिमज्जतु भीमसुता
मनः॥मम किलकृतिमाहृतदर्थिकं नलमुखेन्दुपरं विबुधः स्मरः॥ ३८॥ अत्रदमयंतीकृतवेन्द्र
पालंभप्रसिद्धेंद्रेनिर्याणकालिकमनःप्रवेशाक्रतासंयेविषयः॥ किंतु नलमुखचन्द्र
एवेतितोस्याधिक्यप्रतिपादनादधिकताद्रूपकं॥रूपकस्यसावयवत्वनिरवयवत्वादिभेदप्रपं
चनंतुचित्रमिमांसायांद्रष्टव्यम्॥परिणामः क्रियार्थश्चेद्विषयीविषयात्मना॥ प्रसन्ननेत्रेण जने
क्षितेमादिक्षणा॥ ३५॥ यत्रारोप्यमाणाविषयीकिंचित्कार्योपयोगिनेनिबध्यमानःस्वतस्
नतस्तदुपयोगित्वासंभवात्प्रकृतात्मनापनिमपेक्षतेतत्रपरिणामालंकारः॥तत्रोदाहरणंप्रसन्ने
नेति॥अत्रहिअन्जस्यवीक्षणोपयोगित्वंनिबध्यतेननुदृशः॥मयूरध्वंसकादिसमासेनोत्तरपदार्थप्रा
धान्यात्॥नचोपमितसमासाश्रयणेनदृगन्जमिवेतिपूर्वपदार्थप्राधान्यमास्थितिवाच्यं॥प्रसन्नने
तिसामान्यधर्मप्रयोगादुपमितंव्याघ्रादिभिः सामान्याप्रयोगइतितदप्रयोगएवउपमितसमासानुशासनात्॥

॥६५

पूर्वैसमासोदाहरणमिदंत्वसमासोदाहरणमितिकश्चित्साहः॥५

अन्जस्यवीक्षणोपयोगित्वेनस्वात्मनासंभवतीत्यतस्तस्यप्रकृतदृगात्मनापरिणत्यपेक्षणात्परिणामा
लंकारः॥यथावा॥तीर्त्वाभूतेशमौलिस्रजममरधुनीमात्मनासोतृतीयस्तस्मैसोमित्रिमैत्रीमयमुपकृतवाना
तंनाविकाय॥ग्रामग्राम्यस्तनीभिःशबरयुवतिभिःकौतुकोत्संदृशंकृच्छादन्तीयमातःक्षणमचलमथोचित्रकूटंप्र
तस्थे॥३६॥अत्रारोप्यमाणआतरःसोमित्रिमैत्रीरूपनापत्यानुपयोगिकारकलक्षणकार्योपयोगीनस्वात्मनागृहस्य
रघुनाथैकप्रसादायेक्षितेनेवतनार्थित्वाभावादितिपरिणामः॥बहुभिर्बहुधोल्लेखादेकस्योल्लेखइष्यते॥स्त्री
भिः कामार्थिभिः स्वैरैः कालः शत्रुभिरीक्षितः॥३७॥यत्रनानाविधधर्मयोगिकंवस्तुतत्रैधर्मयोगरूपनिमि
त्तभेदादनेकेनग्रहीशनेकधोल्लिख्यतेतत्रोल्लेखः॥अनेकधोल्लेखनेरूप्यार्थित्वभयादिकंयथार्हंप्रयोजकं॥
रुचिरमितिः॥अर्थित्वंलिप्सा॥भयंभीतिः॥स्त्रीभिरित्यादुदाहरणं॥अत्रैकएवस्त्रजासौंदर्यवितरणपराक्रम
शालीतिस्त्रीभिरर्थीभिः प्रत्यर्थिभिश्चरूप्यार्थित्वभयैः कामकल्पेतरुकालरूपादृष्टः॥यथावा॥गजत्रातेतिरुद्धा
भिः श्रीकौतइतियोवतेः॥यथास्थितश्चबालाभिर्दृष्टःश्रोरिःसकौतुकं॥३८॥अत्रयत्तथाभीतंभर्कंगजंत्रयात्रा

पतेस्मसोयमादिपुरुषोत्तमइतिवृद्धाभिःसंसारभीरुतादभयार्थिनीभिः।कृष्णोयंमथुरापुरंप्रविशन्दृष्टः।
यस्तथाचंचलतेनत्रसिद्धयाःस्त्रियोपिकामोपचारवैदग्ध्यनिष्णंवल्लभःसोयंदिव्यतीतिसमूहैःसोत्कंठैर्दृ
ष्टः।बालाभिस्तबाल्यगतरूपवेषालंकारदर्शनमात्रलालसाभिर्यथावस्थितवेषादियुक्तोदृष्टइतिबहुधोल्लेख
वःपूर्वःकामचाराद्यारोपरूपकसंकीर्णः।अयंतुशुद्धइतिभेदःएकेनबहुधोल्लेखयसोविषयभेदतःउरुर्वृक्ष
र्जुनोयंकौन्तीभीष्मःशरासने।३१॥अहीतभेदाभावेपिविषयभेदाद्बहुधोल्लेखनादसावुल्लेखः।उदाहरणंश्ले
षसंकीर्णं।यत्रोविषयेमहान्यदुरितिवत्बृहस्पतिरित्याद्यर्थान्तरस्यापिक्रोडीकरणात्।शुद्धोयथा।अत्र
शंकुचयोःकुरंविलग्नेविपुलंवक्षःपिविस्तनंनितंबोअधरःकृष्णमाक्षिरक्तविनेकरुणाशालिकपालिभा
गधेयं।४०।स्यात्स्मृतिभ्रांतिसंदेहैस्तदंगलक्षणैस्त्रयंपकेजपश्यतःकांतामुखमेगाहतेमनः।४२।अयंत्र
मत्तमधुपस्त्वन्मुखंवेत्तिपंकजंपंकेजंवासुधांशुर्वयस्माकंतुनानिर्णयः।४३।स्मृतिभ्रांतिसंदेहैःसादृश्या
त्तेनिबध्यमानैःस्मृतिमान्भ्रांतिमान्ससंदेहइतिस्मृत्यादिपदांकितमलंकारत्रयंभवति।तत्रकमणोदृष्टंयथा॥

जीवनग्रहणेनाग्रहीतापुनरुत्थिताः।किंकृतिष्ठाःकिमुन्मेषाद्यदीयंत्रस्यदुर्जनाः॥१॥इदंदाहरणंसंदेहःसमिश्रःकोटिकः।अयंतुसमिश्रकोटिकइतिभेदः।
दिव्यानामपिकृतविस्मयंपुरस्तदंभस्तःस्फुरदरविंदवारुहस्तां।उद्दीप्तश्रियमिवकौस्तुभोरुरंतीमस्माभिर्जलनिधि
मंथनस्यशौरिः॥४४॥पूर्वत्रस्मृतिमुदाहरणेसदृश्यादेवस्मृतिः॥अत्रसदृशलक्ष्मीस्मृतिपूर्वकंतत्संबंधिनोजलनिधि
मंथनस्यापिस्मृतिरितिभेदः।पलाशकुसुमभ्रांत्याशुकतुंडेपतत्यलिः।सोपिजंबूफलभ्रांत्यातमालिंधर्तुमिच्छति॥४५॥
अत्रान्योन्यविषयभ्रांतिनिबंधनःपूर्वस्माद्विशेषः।शुद्धायकृतिरन्यस्यारोपार्थोधर्मिनिह्नवेः।नायंस्थाणुःकिंतर्हिपो
मगंगासरोरुहं॥४७॥वर्णनीयवस्तुनितत्सदृशधर्मारोपफलकस्तदीयधर्मनिह्नवः।कविमतिविकासोल्लसितधर्मान्त
रस्यापिवानिह्नवःशुद्धायकृतिः।यथाचेंद्रियन्नरेंदुरीकारोपफलकस्तदीयधर्मस्यचंद्रत्वस्यापह्नवः।यथावा॥
अंकेकपिशशांकिरेजलनिधेःपंकेपथरेमेनिरासारंगकतिचिन्नसंजगदिरेभूछायमेछन्परे।इंदोर्यद्यलितेंद्रनीलशकुल
श्यामंदरीदृश्यतेतत्सान्द्रंनिपीतमंथनमसंकुक्षिस्थमाचक्ष्महे॥४८॥अत्रोल्लसितधर्मणामपह्नवःपरपक्षोप
न्यासार्थसिद्धः।सएवयुक्तिपूर्वश्चेदुच्यतेहेतूपह्नवः।नेनुस्तीव्रोननिश्चेर्कःसिंधोरेवंयमुत्थितः॥४९॥अत्रचन्द्रएवतीव्रहेत
शत्वसूर्यत्वापह्नवोवडवानलतारोपार्थः।यथावा।मंथानभूमिधरमूलशिलासहस्रसंघट्टनव्रणकिणःस्फुरतीन्दुमध्येछायामृगः

रात्रमरुदित्यतियामरोक्तिस्तेषांकथंचिदपितत्राहिनप्रसक्तिः॥५०॥अत्रचंद्रमध्येमंथनकालिक
मंदराशिलासंघट्टनव्रणकिणस्यवक्षायादीनांसंभवोनास्तीतिछायात्वाद्यपक्षवःपामरवचनत्वेप
न्यासनाविक्षतेः।अन्यत्रतस्यारोपार्थःपर्यस्तापह्नुतिरुक्ता।नायंस्फुरांशुःत्रेयसीमुखं॥५१॥यत्र
क्वचिद्रूपकनिषेधेधर्मेनिह्नवः।अन्यत्रवर्णनीयवस्तुनिषेधेधर्मस्यारोपार्थःसापर्यस्तापह्नुतिः।यथा
चंद्रेचंद्रत्वनिषेधोवर्णनीयेवस्तुनित्रेयसीमुखेनदादोपार्थः।यथावा।हलाहलेनेवविषंविषंरमाजनाः
परंव्यलयमत्रमन्वतेनियोजागर्तिसुखेनतांशिवःस्मरात्रिमांमुंचतिनिद्रयाहरिः।५२॥पूर्वोदाहरणे
हेतूक्तिर्नास्तिअत्रतुसास्तीतिभेदः।ततश्चपूर्वोयापह्नुतिवदत्रापिद्वैविध्यमितिद्रष्टव्यं।भ्रांतापह्नुतिरन्यस्य
शंकायांभ्रांतिवारणे।तापंकरोतिसोलंपंज्वरःकिंनसखिस्मरः।५३॥अत्रतापंकरोतिस्मरवृत्तान्ते
कथितेतत्सज्वरसाधारण्यात्त्राजुबुध्यासख्याज्वरःकिमितिपृष्ठेनसखिस्मरइतितत्वोक्त्याभ्रांतिवारणं

MEMORIAL

कृतं॥यथावा॥नागरिकसमाधिकौन्नतिरिहमहिषःकोत्थमुभयतःपुछः।नहिनहिकरिकलभोयंशुंडा
दंडोयमस्यनहिपुछः॥५४॥इदंसंभवत्भ्रांतिपूर्विकायांभ्रांतपहुतावुदाहरणं॥कल्पितभ्रांतिपूर्विकायथा।
जटानेयंवेणीकृतकवककलापोनगरलंगलेकस्तूरीयंरचितसिताश्रीरखानकुसुमं।इयंभूतिर्नीलेत्रियविरह
जन्मधवलिमीपुरारातिर्भ्रांत्याकुंकुमशरमोकिंग्रहरसि॥५५॥अत्रकल्पितभ्रांतिर्जटानेयमित्यादिनि
षेधमात्रेणोक्तेयापूर्ववत्प्रत्याभावात्॥दंडीत्वत्रतत्तारव्यानोपमेकयमाभेदमने।यदाहानपंमुखमेवेदं
नभंगोवक्षोरुहे।इतिविस्पष्टसादृश्यात्तत्तारव्यानोपमामतेति।छेकापह्नुतिरन्यस्यशंकातत्प्रथमिक्ष
वे॥प्रजल्पन्मत्तेदलग्नःकांतःकिंनहिनूपुरः॥५६॥कस्याश्चित्कोचिदतिरहस्योक्तौअन्येनश्रुतायांउक्ते
स्तासयंतिरवर्णनेननथ्यनिह्नवेछेकापह्नुतिः।यथानापिकयानर्मसचीप्रतिप्रजल्पन्मत्तेदलग्नइतिस्तना
यकवृत्तांतेनिवेद्यमानेतदाकर्ण्यकांतःकिमितिशंकितवतीमन्यांप्रतिनाहिनूपुरइतितथ्यनिह्नवः।यथावासी

स्कारंशिक्षयतिप्रणयस्यधुरंकरोतिरोमांचंनागरिकःकिंमिलितोनहिनाहिसखिंहनःपवनः॥५७॥इदमर्थयो
जनयातथ्यनिह्नवेउदाहरणं॥अन्ययोजनयथावा॥पश्येत्त्रयनेस्मरामिसततंभावोभवकुंतलेनीलेमुग्धति
किंकरोमिमहितेःक्रीतोस्मितेविभ्रमैः।इत्युक्त्वप्रणतोनिराय्यसरुषानिर्भर्त्सितोराधयारुच्छन्त्सरमेवतद्ध
परिद्रानूक्रीडाविटःपातुवः॥५८॥सर्वमिदंविषयांतरयोजनेउदाहरणं॥विषयैक्येप्यवस्थाभेदनयोजनेयथा।
वदंतीजारसंतापंपत्योधूर्तासखीधिया।पतिंबुधासखिंतनःप्रबुद्धास्मीत्यपूरयत्॥५९॥कैतवापह्नुतिर्व्यक्तो
व्याजाद्यैर्निह्नुतेःपदैः॥निर्यान्निस्मरनाराचाःकांताहृत्पातकैतवात्॥७॥अत्रासत्यप्यभिधायिनाकैतवय
देननेमेकांताकटाक्षाः।किंतुस्मरनाराचाइवप्रतीयंतेयथावा।रिक्षुवारिकथयाविपिनोदरेषुमध्या
ह्नजृंभितमहातपतापनप्रभाः।स्कंधांतरोत्थितदवाग्निशिखाच्छलेनजिह्वाप्रसार्यतरवोजलमर्थयंते॥६१॥संभा
वनास्याद्यत्रसाक्षाद्धेतुफलात्मना॥उक्तानुक्तास्यदाद्यासिद्धासिद्धास्पदेपरे॥६२॥धूमस्तोमंतमःशंकेको

कीविरहशुभ्रपांशुलिंपतीवतमोह्याननिवर्षयतीवांजननंनभः॥६३॥रक्तंतवांघ्रियुगलंभुविविक्षेपणाद्भुवं॥
त्वन्मुखोभयछेषान्नूनंपद्मैर्वैरायतेशशी॥६४॥मध्यःकिंकुचयोर्धत्तेबद्धःकनकदामभिः।प्रायोजंतुस्तदन्नै
कंप्रभुतोयेतपस्यति॥६५॥अन्यधर्मसंबंधनिमित्तेनान्यस्यान्यतादात्म्यसंबंधनमुत्प्रेक्षा॥सावस्तुहेतुफ
लात्मगोचरत्वेनत्रिविधा॥अत्रवस्तुनःकस्यचिद्वस्त्वंतरादात्म्यसंभावनाप्रथमास्वरूपोत्प्रेक्षोच्यते॥अहेतोर्हे
तुभावोनाफलस्यफलत्वेनोत्प्रेक्षाहेतूत्प्रेक्षाफलोत्प्रेक्षेत्युच्यते।तत्राद्यास्वरूपोत्प्रेक्षाउक्तविषयानुक्तविष
याचेतिद्विविधा॥परेहेतुफलोत्प्रेक्षसिद्धविषयाःसिद्धविषयाचेतिप्रत्येकंद्विविधे॥एवंषण्णामुत्प्रेक्षाणांधूम
स्तोमादिभिस्तादिनाक्रमेणोदाहरणानि॥रजनीमुखेसर्वत्रविस्तीर्णस्यतमसोनेत्यरुष्टप्रतिरोधकत्वादिधर्म
संबंधनगम्यमानेननिमित्तेनसद्यःप्रियविघटितसर्वदेशास्थितकोकांगनाहृदुपगतप्रज्वलिताद्विरहानल
धूमस्तोमतादात्म्यसंभावनास्वरूपोत्प्रेक्षा॥तमसोविषयस्योपादानादुक्तविषया।तमोव्यापनस्यनभःप्रभृतिभूत

र्यन्तसकलवस्तुसांद्रमलिनीकरणेननिमित्तेनतमः कर्तृकलेपनतादात्म्योत्प्रेक्षानभः कर्तृकांजनव
र्षणतादात्म्योत्प्रेक्षावानुक्तविषयास्वरूपोत्प्रेक्षा॥उभयत्रापिविषयभूतस्यतमोव्यापनस्यातुपादाना
त्तत्रानुक्तविषया॥नन्वत्रतमसोव्यापनेननिमित्तेनलेपनकर्तृतादात्म्योत्प्रेक्षा॥नभसोभूम्यर्यन्तगा
ढनीलिमव्याप्तत्वेननिमित्तेनांजनवर्षणकर्तृतादात्म्योत्प्रेक्षावेत्युक्तत्वेदाह्यमनुक्तविषयमेवास्तु॥मैवं॥
लिंपतिवर्षतीत्याख्यातयोः कर्तृवाचकलेपिभावप्रधानेमाख्यानमितिस्मृतेर्धात्वर्थक्रियायाएवप्रा
धान्येनतदुपसर्जनत्वेनाचित्तस्यकर्तुरुत्प्रेक्षणीयतयान्यत्राचयासंभवात्॥अतएवहेतोस्तस्योपमा
यामुपमानतयान्वयोदंडिनानिरूपितः॥कर्तायदुपमानंस्यात्प्रकृतोसौक्रियापदं॥स्वक्रियासाधन
व्यग्रोनालमन्यंपेक्षितुमिति॥६६॥केचित्तुतमोनभसोर्विषययोस्तत्कर्तृकलेपनवर्षणस्वरूपधर्मोत्प्रे
क्षेत्याहुः॥तन्मतेस्वरूपोत्प्रेक्षायधर्म्युत्प्रेक्षाधर्मोत्प्रेक्षेत्येवंद्वैविध्यंद्रष्टव्यं॥चरणयोःस्वतःसिद्धरक्तिमनिवस्तुतोवि

क्षेपणंनहेतुरितिअहेतोस्तस्यहेतुत्वेनसंभावनायांहेतूत्प्रेक्षा॥विक्षेपणस्यविषयस्यसत्वात्सिद्धविषया॥
चन्द्रप्रविरोधेस्वाभाविकेनापिकारणेनकांतिप्रेक्षानहेतुरितितत्रतद्धेतुत्वसंभावनाहेतूत्प्रेक्षा॥वस्तु
तस्तद्विषयाप्रभावादसिद्धविषया॥मध्यःस्वयमेवकुचौधरतिनतुकनकदामवद्धत्वेनाध्यवसिता
यावलित्रयशालितायावलादितिमध्यकर्तृकुचध्वंसस्तत्फलत्वेनोत्प्रेक्षासिद्धविषयाफलोत्प्रेक्षा॥जल
जस्यजलेनिजावस्थितेरुदवासनयत्वेनाध्यवसितायाः कामिनीचरणसायुज्यप्राप्तिर्फलमितितस्या
गगनकुसुमायमानायास्तपःफलत्वेनोत्प्रेक्षणंअसिद्धविषयाफलोत्प्रेक्षा॥अनेनैवक्रमेणोदाहरणा
न्तराणि॥बालेन्दुवक्राण्यविकाशभावाद्भुःपलाशान्यतिलोहितानि॥सद्योवसंतेनसमागतानांनख
क्षतानीवदनस्थलीनां॥६७॥अत्रचपलाशकुसुमानांवक्त्वलोहित्यसंबंधेननिमित्तेनवसंतनायकस
मागतवनस्थलीसंबंधिसद्यःकृतनखक्षततादात्म्यसंभावनाउक्तविषयास्वरूपोत्प्रेक्षा॥पूर्वोदाहरणेनिमि

नभूततथमेसंबंधोभगम्यइहतूपानद्यतिभेदः॥नचिवशब्दस्यसादृश्यपरत्वेनप्रसिद्धतरत्वादुपमैवास्तु॥लिं
पतीवेत्युदाहरणेलेपनकर्तुरुपमानत्वाद्दृश्यक्रियायसर्जनत्वंवदिहनवस्तूनामन्यापसर्जनत्वस्योपमागाध
कस्यासंभवात्॥उच्यते॥उपमायत्रकचित्स्थितेरपिनक्षरवेतःसहवर्तुंशक्यतयाबसंतनायकसमागवन
स्थलीसंबधित्वस्यविशेषणस्यानपेक्षत्वादिहतत्रतूपादानंपलाशमुकुलानानवस्तुतादात्म्यसंभावना
यामिवशब्दमवस्थापयतीतितथात्वेवतद्विशेषणसाफल्यात्॥अस्तिचसंभावनायामपीवशब्दः॥दूरंतिष्ठन्द्
त वदन्तइवाभातीति॥पिनष्टीवैरंगोत्रैःसमुद्रःफेनचंदनं॥तदादायकरैरुल्लिंपतीवादिगंगना॥६८॥अत्रतरं
गोत्रैःफेनचंदनस्यप्रेरणंपेषणंतूत्प्रेक्ष्यते॥समुद्रादुत्थितस्यचंद्रस्यप्रथमंसमुद्रपूरेप्रस्तानाकराणा
दिक्षुव्यापनंचसमुद्रेणपात्रेफेनचंदनकृततत्लेपनत्वेनोत्प्रेक्ष्यते॥उभयत्रक्रमेणसमुद्रांतर्गतफेनचंदनपु
नीभवनंदिशांधवलीकरणंचनिमित्तमितिफेनचंदनप्रेरणाकिरणव्यापनयोर्विषययोरनुपादानादनुक्तवि

स्वरूपोत्प्रेक्षे॥येषांतूपानयोःसमुद्रचंद्रयोरेवतत्कर्तृकपेषणलेपनरूपधर्मोत्प्रेक्षितमंतेषांपूर्वोदाहरं
णेधर्मिणिधर्म्यन्तरतादात्म्योत्प्रेक्षा॥इहतुधर्मिणिधर्मसंसर्गोत्प्रेक्षेतिभेदोवगंतव्यः॥रात्रौरविर्दिवाचं
द्रोरभावादिवसप्रभुः॥भूमौप्रतापयशसीसृष्टवान्सततोदिते॥६९॥रात्रौरविर्दिवाचंद्रस्याभावःसन्नपि
प्रतापयशःसर्गेनहेतुरितिनस्यतद्धेतुत्वसंभावनासिद्धविषयाहेतूत्प्रेक्षा॥विवस्वतानापिषतेवमिश्राःस्व
गोसहस्रेणसमंजनानां॥गावोपिनेत्रापरनामधेयास्तेनेहमांध्यंखलुनोधकरैः॥७०॥अत्रविवस्वतास्व
किरणैःसहजनलोचनानानयनमसदेवरात्रावांध्यंप्रतिहेतुत्वेनोत्प्रेक्ष्यतइत्यसिद्धविषयाहेतूत्प्रेक्षा॥
पूरंविधुर्धर्षयितुंपयोधेःशंकेयमेणांकमणिंकियंति।पयांसिदोग्धिश्रियविप्रयोगसशोककाकीनये
नकियंति॥७१॥अत्रचंद्रकृतंसमुद्रस्यरूपणसदेवतदातेनकृतस्यचंद्रकांतद्रावणस्यकोकांगना
वाष्पस्रावणस्यचफलत्वेनोत्प्रेक्षनदृतिसिद्धविषयाफलोत्प्रेक्षा॥रथस्थितानांपरिवर्तनायपुरातनाना

मिवबाहनानाम्। उसतिभूमोतुरगोत्तमानांदिशिप्रतस्थेरविरुत्तरस्यात्॥ अत्रोत्तरायस्याश्वपरिवर्त
नमसदेवफलत्वेनोत्प्रक्षतेइत्यसिद्धविषयाफलोत्प्रेक्षा॥एता एवोत्प्रेक्षाः मन्येशंकेध्रुवंप्रायान्नू न
मित्येवमादिभिः॥उत्प्रेक्षाद्योत्यतेशब्दैरिवशब्दोपितादृशइत्युत्प्रेक्षाव्यंजकत्वेनपरिगणितानां
शब्दानामप्रयोगेगम्योत्प्रेक्षाः॥यथा॥त्वत्कीर्त्तिर्भ्रमणश्रांताविवेशास्वर्गनिम्नगामिति॥रूप
कातिशयोक्तिस्यान्निगीर्याध्यवसानतः॥पश्यनीलोत्पलदलश्यामानिःसरतिशोभिताः शराः॥७४॥वि
षयस्यस्वशब्देनोल्लेखनंविनाविषयिवाक्येनैवशब्देनग्रहणंविषयनिगरणंतत्पूर्वकंविषयस्य
विषयिरूपतयाध्यवसानमाहार्यनिश्चयः॥तस्मिन्सतिरूपकातिशयोक्तिः॥यथानीलोत्पलशर
शब्दाभ्यांलोचनयोः कटाक्षाणांवग्रहणनिगरणपूर्वकंतद्रूपताध्यवसानं॥यथावा॥वापीकापि
स्फुरतिगगनेतत्सरंसूक्ष्मपद्मासोयानालीमधिगतवतीकांचनीमेंद्रनीलीं॥अयंशैलोसुकृतिस्फ

गमोचंदनछत्रदेशोतत्रस्थानांसुलभममृतंसन्निधानात्सुधांशोः॥७५॥अत्रवाप्यादिशब्दैर्नामप्रभृतयो
निगीर्णाः॥अत्रातिशयोक्तौरूपकविशेषणंरूपकेदर्शितानांविधानामिहापिसंभवोस्तीतिदेशेनप्रदर्श
र्थतेनात्रार्थदोषतिशयोक्तिस्तादृगतिशयोक्तिरितिद्विविधं॥तत्राधिक्यन्यूनताऽनुभयत्वंचेतिसर्वम
नुसंधेयं॥यथावा॥समावद्भासरूपवनेकोरेरनुसृतः किरज्योत्स्नामछांनवलवलिपाकप्रणयिनीं॥उपप्राका
रांशहिराऽनयनेतकेयमनागनाकाशेकोयंगलितहरिणः शीतकिरणः॥७६॥अत्रकोयंगलितहरिणइत्युक्त्या
प्रसिद्धचंद्राद्भेदः॥ततउत्कर्षश्चगर्भितः॥एवमन्यत्राप्यूहनीयं॥यथापक्वतिगर्भत्वंसेनसापक्वबामता॥त्वत्सूक्ति
सुधाराजन्भ्रांताःपश्यन्तिकांविधो॥७७॥अत्रत्वत्सूक्तिमाधुर्यमेवामृतमित्यतिशयोक्तिः चंद्रमंडलस्थमे
मृतंनभवतीत्यपक्वतिगर्भा॥यथावा॥मुक्ताविद्रुममंतरामधुरसःपुष्पंपरंधूर्वहंश्रालेयद्युतिमंडलेखलुतयो
रेकासिकानार्णवे॥तच्चोदंचतिशयमूर्ध्निनपुनःपूर्वोक्तलाभांतरतानीमानिविकल्प्यंतितद्भेदेषानसादृश्येषु७८॥

अत्राधरस्य एवमधुरस इत्यतिशयोक्तिः पुष्परसोनमधुरस इत्यापकृतिगर्भा॥ अलंकारसर्वस्वकृतास्वरूपोल्ले
खायांसापह्नवेनमुक्तं॥ गतासुतीरंतिमिघट्टनेनससंभ्रमंपोरविलासिनीषु॥ यत्रोल्लसत्फेनतनिछलेनमुक्ताद
हासेवविभातिशिप्रा॥७९॥ इति॥ ततस्त्रियानत्रभेदः॥ यत्रशुद्धापकृतिगर्भत्वं॥ यत्रफेनततित्वमपकृ
तंतत्रैवादहासलोल्लेखणात्॥ हेतुपर्यस्तापकृतिगर्भत्वंहनुमंडलादावपकृतस्यास्यनादेःसख्यादिषुभिवे
शनात्॥ इदंचपर्यस्तापकृतिगर्भत्वंमुल्लेखायामपिसंभवति॥ तत्रस्वरूपोल्लेखायांयथा॥ जानेतिरागादिद
मेवबिंबंबिंबस्यचच्यकमितोधरत्वं॥ इयोर्विशेषावगमाक्षमाणांनाम्निभ्रमोहृदयोर्जनानाम्॥८०॥
अत्रप्रसिद्धफलबिंबतामपकृत्यातिरागेणनिमित्तेनदमयंतस्यधरेतदुल्लेखापर्यस्तापकृतिगर्भा॥ हेतूल्लेखायां
तद्गर्भत्वंप्रालिखितेहेतूल्लेखोदाहरणेएवदृश्यते॥ तत्रबांधकारेबांध्यहेतुत्वंअपकृत्यान्यत्रनिवेशितं॥ फलो
ल्लेखायायथा॥ रविनक्तोगजःपद्मान्नदृष्ट्वाधितुंध्रुवं॥ सरोविशतिनस्तातुंगजस्तानंहिनिष्फलं॥८१॥ अत्र

MEMORIAL

गजस्यसरःप्रवेशंप्रतिफलेस्नानेफलत्वमपकृत्यपद्मबाधनेतन्निवेशितं॥ अलमनयाप्रसक्तानुप्रसक्त्या॥ प्रकृ
तमनुसरामः॥ भेदकातिशयोक्तिरूपतस्यैवान्यत्ववर्णनं॥ अन्यदेवास्यगांभीर्यमन्यद्धैर्यमहीपतेः॥८२॥ अत्रै
लोक्यप्रसिद्धगांभीर्योद्यभेदेपिभेदोवर्णितः॥ यथावा॥ अन्येयंरूपसंपत्तिरन्यावैदग्ध्यधोरणी॥ नैषानलिनपत्
त्रासीसृष्टिःसाधारणीविधेः॥८३॥ संबंधातिशयोक्तिः स्यादयोगेयोगकल्पनम्॥ सौधाग्राणिपुरस्यास्यस्पृशं
तिविधुमंडलम्॥८४॥ यथावा॥ कतिपयदिवसैःसयंप्रयायान्नकगिरिःकृतवासरावसानः॥ इतिमुदमुपया
तिचक्रवाकीवितरणशालिनिवीरुद्देवे॥ अत्रचक्रवाक्याः सूर्योत्तमपकारकमहामेरुसंभावनाप्रयुक्तसं
तोषासंबंधेपितत्संबंधोवर्णितः॥ योगेयोगःसंबंधातिशयोक्तिरितीर्यते॥ क्वयिदातरिराजेन्द्रस्वर्द्रुमाद्याद्रिया
महे॥ अत्रस्वर्द्रुमाद्रिसंबंधेपितत्संबंधोवर्णितः॥ यथावा॥ अनयोरनवद्यांगिसतनयोर्जृंभमाणयोः॥ अवकाशो
नपर्याप्तस्तवक्रुचतांतरे॥८५॥ अक्रमातिशयोक्तिः स्यात्सहत्वंहेतुकार्ययोः॥ आलिंगंतिसमंदेवज्योत्स्नाश्च
परांश्चते॥८६॥ अत्रपदार्थोर्ध्वशरसंधानंतदानीमेवशत्रवःक्षितौपतंतीतिहेतुकार्ययोःसहत्वंवर्णितं॥ यथावा॥ मुंच

तिसुंचतिकोशंभजतिचभजतिप्रकंपमरिवर्गः॥हम्मीरवीरखड्गेत्यजतित्यजतिक्षमामाशु॥८९॥अत्रखड्गस्य कोशत्यागादिकालएवरिपणांधनगृहत्यागादिर्वर्णितः॥चपलानिशायोक्तिस्तत्कार्यहेतुप्रसक्तिर्जे॥यास्याः मीत्यदितेतन्यवलयोभवद्भूर्मिका॥९०॥अत्रनायकप्रवासप्रसक्तिमात्रेणयोषितोतिकार्यकार्यमुखेनद र्शितं॥यथावा॥आदातुंसकृदीक्षितेपिकुसुमेहसाग्रमालोहितंलाक्षारंजनवार्त्तयापिसहसारक्तंतलंपाद योः॥अंगानामनुलेपनस्मरणमप्यंतस्तवेदावहंहंताधीरदृशःकिमन्यदलकामोदोपिमारायते॥९१॥यथावा॥ यामिनयामीतिधमेवेवदतिपुरस्तात्क्षणेनतन्वंग्याः॥गलितानिपुरोवलयान्यपराण्यपितथैवदलितानि॥९२॥ अत्यंतातिशयोक्तिस्तत्पौर्वापर्यव्यतिक्रमे॥अग्रेमानोगतःपश्चादनुनीताप्रियेणसा॥९३॥यथावा॥कर्वीद्राणा मासन्नथमृतरमेवांगणभुवश्चलद्भृंगासंगाकुलकरिमदामोदमधुराः॥अमीपश्चात्तेषामुपरिपतिताःकुड्मलपतेः कदाताःक्षीरोदप्रसरदुरवीचीसहचराः॥९४॥एतास्तिस्रोपतिशयोक्तयःकार्यस्योपन्यासनार्थाः॥वर्ण्यानां मितरेषांबाधर्मैक्यंतुल्ययोगिता॥संकुचंतीतिसरोजानिस्वैरिणीवदनानिच॥९५॥तदंगमादेयदृष्टेरुपचित्तेनभासते॥

मालतीशशभृल्लेखाकदलीनांकुरोरता॥९६॥प्रस्तुतानामप्रस्तुतानांवाणक्रियारूपैकधर्मान्वयस्तुल्य योगिता॥संकुचंतीतिप्रस्तुततुल्ययोगितापामुदाहरणम्॥तत्रप्रस्तुतचंद्रोदयकालिकतयावर्णनीयानां सरोजातंप्रकाशभितस्वैरिणीवदनानांचसंकोचरूपैककियान्वयोदर्शितः॥उत्तरस्लोकेनापिकासोकुमा र्यवर्णनेप्रस्तुतेअवर्णनीयानांमालत्यादीनांकुरोरतारूपैकगुणान्वयः॥यथावा॥संजातपत्रप्रकारान्विता निसमुद्भूतिस्फुटपाटलत्वं॥विकसरारापकैकराभिमृष्टाहिनानिपद्मानिचवृद्धिमीयुः॥९७॥नागेंद्रहस्ता स्त्वचिकर्कशत्वादकांतश्चेत्याकदली विशेषाः॥लब्धापिलोकेपरिणाहिरूपंजातस्तदूरूपमानबाह्याः॥९८॥ अत्रग्रीष्मवर्णनेतदीयेनप्रस्तुतानांदिनानापद्मानांचैककियान्वयः॥पुरुवर्णनेऽप्रस्तुतानांकरिक राणांकदलीनांचैकगुणान्वयः॥हिताहितेवृत्तितोल्यमपरातुल्ययोगिता॥प्रदीयतेपराभूतिर्मित्रशात्र वयोस्त्वया॥९९॥अत्रहिताहितयोर्मित्रशात्रवयोरुत्कृष्टभूतिदानस्यपराभवदानस्यचश्लेषणाभेदाध्यवसा यादुक्तितोल्यम्॥यथावा॥यश्चनिंबपरशुनायश्चनंमधुसर्पिषा॥यश्चनंगंधमाल्याद्यैःसर्वस्यकटुरेवसः॥१००॥अत्र

त्रयश्चतिसिचयर्चतिरथ्याद्वारैर्वाक्यानि पूरणीयानि॥ इत्येवोदाहरणंस्मृतिपर्यवसापि॥ इदंतुनिंदापर्यवसा
यीतिभेदः॥ इयंसरस्वतीकंठाभरणोक्तातुल्ययोगिता॥ गुणोत्कृष्टैःसमीकृत्यवचोन्यातुल्ययोगिता॥ लोक
पालोयमःपाशीश्रीदःशंकरोभवानपि॥१॥ अत्रवर्णनीयोराजाशंकरादिभिर्लोकपालत्वेनसमीकृतः॥ य
थावा॥ संगतानिमृगाक्षीणांतडिद्विलसितान्यपि॥ क्षणद्वयंनतिष्ठंतिघनारब्धान्यपिस्वयं॥२॥ पूर्वत्रस्मृतिरिह
निदा॥ इयंकाव्यादर्शेदर्शिता॥ रमांतुल्ययोगिनांसिद्धिरितिकेचिद्वज्रुः॥ पद्माजयदेवःसिद्धैःख्यातेषुचेन्ना
मकीर्त्यतेतुल्यतोक्तये॥ युवामहविख्यातोलंबलेर्जलधिर्जलेरिति॥३॥ मतांतरेत्वत्रवक्ष्यमाणंदीपकमेव॥ इदं
तिवर्ण्योवरार्यानांधर्मैक्यंदीपकंबुधाः॥ मदेनभातिकलभःप्रतापेनमहीपतिः॥ प्रस्तुताप्रस्तुतामेकधर्मान्वा
योदीपकं॥ यथाकलभनरपालयोःप्रस्तुताप्रस्तुतयोर्भानक्रियान्वयः॥ यथावा॥ मलिःशाणोल्लीढःसमर
विजयीहेतिदलितोमदक्षीणोनागःशरदिसरितःश्यानपुलिनाः॥ कलाशेषश्चंद्रःसुरतमृदितावालवनिता
निम्नाश्चोभंतेगलितविभवाश्चार्थिषुनृपाः॥४॥ अत्रप्रस्तुतानांनृपाणामप्रस्तुतानांमण्यदीनांचैकधर्मा

न्वयः॥ प्रस्तुतैकनिष्ठःसमानोधर्मःप्रसंगादन्यत्रोपकरोति॥ प्रासादार्थमारोपितोदीपोरथ्यायामि
वेतिदीपसादृश्याद्दीपकं॥ संज्ञायांचेतिस्वार्थेकन्प्रत्ययः॥ यद्यपि॥ सुवर्णपुष्पांपृथिवीचिनोतिपुरुषास्त्र
यः॥ शूरश्चकृतविद्यश्चयश्चजानातिसेवितुं॥६॥ इत्यत्रप्रस्तुताप्रस्तुतानांयुगपद्धर्मान्वयः॥ प्रति
भाति॥ मदेनभातिकलभइत्यत्राप्रस्तुतस्यैवप्रथमंधर्मान्वयः॥ तथापिप्रासंगिकत्वंनहीयते॥ यस्मा
त्प्रस्तुतोद्देशेनप्रवृत्तस्यैववर्णनस्याप्रस्तुतेपर्यवस्यात्॥ नहिदीपस्यरथ्याप्रासादयोर्युगपदुप
कारित्वेनजातावेकवचनार्थेऽपितस्यरूपस्यातिथिभ्यःप्रथमपरिवेषणेनत्वप्रासंगिकत्वंहीयते॥ तुल्ययो
गितायांत्वंकेप्रस्तुतेमन्यदप्रस्तुतमितिविशेषायग्रहणात्सर्वत्रैवधर्मोक्तिरितिविशेषः॥ अयं
चानयोरपरोविशेषः॥ उभयोरनयोरुपमालंकारस्यगम्यतायांविशेषेपि॥ अत्राप्रस्तुतमुपमानंप्रस्तुत
मुपमेयमितिव्यवस्थितउपमानोपमेयभावस्तत्रतुविशेषाग्रहणादेषोऽकः सइति॥ त्रिविधंदीपकावृ
त्तोपवेदाकृतिर्दीपकं॥ वर्षासुबृंदमालेयवर्षत्येषावशर्वरी॥ उन्मीलंतिकदंबानिस्फुटंकुटजोद्गमाः॥

माद्यंतिचातकास्तमामाद्यंतिचृषिरवावलाः॥८॥दीपकस्यानेकोपकारार्थतयादीपस्थानीयस्यशब्दस्यार्थस्य
वाउभयोर्वाआवृत्तौत्रिविधमावृत्तिर्दीपकं॥क्रमेणाद्यत्रयेणोदाहरणानि॥यथावा॥उत्कंठयतिमेघानांमा
लावर्गंकलापिनां॥यूनांचोत्कंठयत्यधमानसंमकरध्वजः॥९॥शमयतिजलधरधारावातकयूनांतपंचि
रोषनृणां॥क्षपयतिवधूलोचनजलधाराकामिनांप्रवासरुचिम्॥१०॥वदनेननिर्जितंतवनिलीयतेचंद्रबिं
बमंबुधरे॥अरविंदमपिचसुंदरिनिलीयतेवाथसांपूरे॥११॥एवंचाद्यानांप्रस्कृताप्रस्कृतोभयविषयत्वा
भावेदीपकछायापनिमात्रेणदीपकव्यपदेशः॥वाक्ययोरेकसामान्येप्रतिवस्तूपमामता॥तापोनभो
जतेसूरःशूरश्चायेनराजते॥१२॥यत्रोपमानोपमेयवाक्ययोरेकःसाधारणोधर्मःपृथङ्निर्दिश्यतेसाप्रति
वस्तूपमा॥प्रतिवस्तुप्रतिवाक्यार्थमुपमासमानोधर्मोस्यामितिव्युत्पत्तेः॥यथात्रैवभ्राजतेराजतेरेक
एवधर्मउपमानोपमेयवाक्ययोःपृथग्भिन्नपदाभ्यांनिर्दिष्टः॥यथावा॥स्थिरोनोलीगुणवतांखलुबुधानबाध
तेरत्नदीपस्यहिशिखावातयापिनूनाश्यते॥१३॥यथावा॥तवामृतस्यंदिनिपादपंकजेनिवेशितात्माकथमन्य

दिछति॥स्थितेरविंदमकरंदनिर्भरेमधुव्रतोनेक्षुरकंहिवीक्षते॥१३॥अत्रचयद्यपिउपमेयवाक्येऽनि
छाउपमानवाक्येत्वविक्षेतिधर्मभेदःप्रतिभातितथापिविक्षणमात्रस्यावर्जनीयस्यप्रतिषेधान
हत्वादिछापूर्वकंवीक्षाप्रतिषेधोयमनिछायैवसितएवैतिधर्मैक्यमनुसंधेयं॥अथावृत्तिःप्रस्कृता
नांवा॥प्रतिवस्तूयमानुप्रस्कृताप्रस्कृतानामितिविशेषः॥अयंवापरोविशेषः॥अवृत्तिदीपकंवै
धर्म्येणानभवतिप्रतिवस्तूयमानुवैधर्म्येणापिदृश्यते॥यथा॥विद्वानेवहिजानातिविद्वज्जनपरिश्रमं॥
नहिवंध्याविजानातिगुर्वीप्रसववेदनां॥१५॥यदिसंतिगुणाःपुंसांविकसंत्येवतेस्वयं॥नहिकस्तूरिका
मोदःशपथेनविभाव्यते॥१६॥वेद्विंबप्रतिबिंबतंदृष्टांतैः॥त्वमेवकीर्त्तिमानिंत्रकीर्त्तिकात्वांबिंबप्रतिबिंब
भावः॥यथावा॥कामंनृपाःसंतिसहस्रशोन्यराजन्वतीमाकुरुतेनभूमिम्॥नक्षत्रताराग्रहसंकुलापिज्योति
ष्मतीचंद्रमसेवरात्रिः॥१८॥यथावा॥देवींवाचमुपासतेहिबुधाःसारंतुसारस्वतंजानीतेनितरामसौगुरुकुलक्लि
ष्टोमुरारिःकविः॥अधिक्षेपेतिनवेगानरघटेःकिंतस्यगंभीरतामापातालनिमग्नपीवरतनुर्जानातिमंथाचलः॥१९॥

तन्न त्रोपमानोपमेयवाक्ययोर्ज्ञानमेकएवधर्मइतिप्रतिवस्तूपमायुक्ता॥नैवम्॥अत्रैतन्मंथान्तरज्ञानस्य बाधितत्वेनतत्रजानातीत्यनेनसागराधस्तलावधिर्यर्यन्तसंस्पर्शमात्रस्यविवक्षितत्वात्॥अत्रोदाहरणेपदा वृत्तिदीपकाद्विशेषःपूर्ववत्प्रस्तुताप्रस्तुतविषयत्वकृतोद्रष्टव्यः॥वैधर्म्येणायंदृश्यते॥यथा॥कूतंवंगवधूमिमु खंमनस्वयाकिमन्यदेवंविहताश्वनोदृशः॥तमोसितिष्ठंतिहितावदंशुमान्नयावदायादुदयाद्विमौलितां॥२०॥ वाक्यार्थयोःसदृशयोरेक्यारोपोनिदर्शनां॥यद्वानुःसौम्यतासेयंपूर्णेन्दोरकलंकता॥२१॥अत्रदाढ्यपुरुष सौम्यत्वस्यउपमेयवाक्यार्थस्यपूर्णेन्दोरकलंकत्वस्योपमानवाक्यार्थस्यचयत्नेनैक्यारोपः॥यथावा॥अरण्य रुदितंकृतंशबरारिमुद्दिश्यतंस्थलेन्जमवरोपितंसविरमूषेरवर्षितं॥श्रुपुछमवनामितंबधिरकर्णजायःकृतो धृतोधमुखदर्पणोयदबुधोजनस्यार्पितः॥२२॥अत्राबुधजनसेवायाअरण्यरुदितादीनांचयत्नेनैक्यारो पः॥पदार्थवृत्तिमप्येकेवदंत्यन्योनिदर्शनं॥खन्नेत्रयुगलंधत्तेलीलांनीलांबुधन्मनोः॥२३॥अत्रनेत्रयुगलेनी लांबुजगतलीलापदार्थानांयोनिदर्शना॥यथावा॥वियोगेगोऽनारीणांयोगेऽतलपांडिमा॥अदृश्यतसखेदूरी ॥१७॥

मंजरीगर्भरेणुषु॥२४॥पूर्वस्मिन्नुदाहरणेउपमेयेउपमानधर्मारोपः॥इहत्वुपमानेउपमेयधर्मारोपइतिभेदः॥उभय त्रापन्यधर्मस्यान्यत्रासंभवेनतत्समानधर्मासेपादोसम्यपर्यवसानंतुल्यम्॥इयंपदार्थवृत्तिनिदर्शनालक्षितोपमेति जयदेवेनव्यवहृता॥यद्यपिवियोगेगोऽनारीणांवृत्तिश्लोकःप्राचांनैवाक्यार्थनिदर्शनायामुदाहृतस्तथापिवि शिष्टयोर्धर्मिणोरेक्यारोपोवाक्यार्थवृत्तिनिदर्शना॥उपमानोपमेययोरन्यतरस्मिन्नन्यतरधर्मारोपःपदार्थवृत्ति निदर्शनेतिव्यवस्थामाश्रित्यास्माभिरिहोदाहृतः॥एवंचलायिसतिशिवदातर्यस्मदभ्यर्थितानामितरमनुसरं तोदर्शयत्नोर्थिमुद्रां॥चरमचरणपातैर्दुग्धदोग्ध्यकामाःकरंभमनुसरामःकामधेनोस्थितायां॥२५॥दाभ्यां तिनीषुरधिनृषुस्वदुणार्लवम्॥इत्यादेवाक्यभेदाभावेपिवाक्यार्थवृत्तिरेवनिदर्शना॥विशिष्टयोरैक्यारोप सद्भावात्॥वाक्यार्थयोःसदृशयोरितिलक्षणवाक्येवाक्यार्थशब्देनबिंबप्रतिबिंबभावापन्नवस्तुविशिष्टरूपयोः प्रस्तुताप्रस्तुतधर्मणोर्विवक्षितत्वात्॥एवंचराजसेवामनुष्ठानामसिधारावलेहनं॥पंचाननपरिष्वंगोव्यालीव दनचुंबनमित्यत्रप्रस्तुताप्रस्तुतयोरेकैकपदोपात्तेपिवाक्यार्थवृत्तिनिदर्शनायानक्षतिः॥योर्बिंबभावा यत्नवस्तुविशिष्टव्यापारस्तूपलादिति॥अतएवनिदर्शनायारूपकाद्भेदः॥रूपकेह्यविशिष्टयोरेवमुखचंद्रादिकयोरैक्या

परोपः ॥ अघ्रिदंडोहरेरूर्ध्वमुस्रिमोबलिनियहे ॥ विधिविष्टरपद्मस्यनालदंडोमुदेस्तुवइतिविशिष्टरूपकोद्दा
हरणेपिनबिंबप्रतिबिंबभावायत्नवस्तुविशिष्टता ॥ विधातृविष्टरकमलश्लिष्टत्वरूपसाधारणधर्मवत्ता
संपादनार्थमेवतत्रविशेषणोपादानात् ॥ यद्वातुः सौम्यतेत्यादिदिग्नोदाहरणेषुदात्पूर्णेंदादीनामानं
दकरत्वादिनेवात्रविशेषणयोर्बिंबप्रतिबिंबभावाभावात् ॥ यत्रतुविषयविषयिविशेषणानांपरस्परसा
दृश्येनबिंबप्रतिबिंबभावोस्तिःज्योत्स्नाभस्मधुरणधवलाबिभ्रतीतारकास्त्रीस्पन्तद्दीनव्यसनरासिकारात्रि
कापालिकीयम् ॥ द्दीयाद्दीपांत्रमतिदधतीचन्द्रमुद्राकपालेन्यस्तंसिद्धांजनपरिमलंलोचनस्यछलेनेतिसाव
यवरूपकोदाहरणेतत्रापिविषयविषयिणोस्तद्विशेषणानांचप्रत्येकमेवैक्यारोपः ॥ नतुज्योत्स्नादिविशिष्ट
रात्रिरूपविषयस्यभस्मादिविशिष्टकापालिकीरूपविषयिणश्चविशिष्टरूपेणैक्यारोपोस्ति ॥ तस्माद्दाजसे
वामनुष्याणामित्यादानपिवाक्यार्थस्यनिदर्शनेतियुक्तं ॥ मतांतरेत्विहयदर्थवत्येवनिदर्शनयाभाव्यं ॥ अपरां
बोधनंप्राहुःक्रियायासत्सदर्थयोः ॥ नन्वेद्दाजविरोधीतिक्षीणंचन्द्रोदयेतमः ॥ २८ ॥ उदयन्नेवसवितापप्रेघूर्घ्य

॥१८८॥

तिश्रियं ॥ विभावयन्समृद्धीनांफलंसुहृदनुग्रहं ॥ २९ ॥ कस्यचित्किंचित्क्रिययाविशिष्टस्यस्वक्रिय
यापरान्प्रत्यसतःसतोवार्थस्यबोधनंयन्निबध्यतेतदपरंनिदर्शनामाहुः ॥ असदर्थबोधनेउत्तराईमु
दाहरणं ॥ तत्रनश्येदितिबोधयदितिवक्तव्येबोधयदित्यगम्यमानत्वात्अत्रयोगः ॥ ततश्चराज्ञावंद्येण
सहविरुध्यस्वयंनाशक्रिययाविशिष्टं ॥ तमःस्वकीयनाशक्रिययादृष्टांतभूतयाअन्यायेवंराजविरुद्धश्चेत्र
त्रेयदित्यनिष्टपर्यवसायिनमर्थंबोधयदेवनष्टमितिनिबंधनादसदर्थनिदर्शना ॥ तथाउत्तरश्लोकेसविता॰
स्वोदयसमसमयमेवप्रेषुलक्ष्मीमादधानस्तयापद्मलक्ष्यधानक्रिययापरान्प्रतिसमृद्धीनांफलंसुहृदनुग्र
हएवेतिश्रेयस्करमर्थंबोधयन्निबद्धइतिसदर्थनिदर्शना ॥ यथाका ॥ उन्नतंपदमवाप्यलोलघूर्ध्वलंघवसपतेर्दि
तिश्रियं ॥ शैलशेखरगतःरुषक्षणश्चारुमारुतधुतःपतत्यधः ॥ ३० ॥ अत्रगिरिशेखरगतरुषिबिंदुकणोमंद
मारुतयात्रेणापिकंपितःपतँल्लघोरुत्तनपदप्राप्तिपतनहेतुरित्यसदर्थबोधयन्निबद्धत्यसदर्थनिदर्शना॰ चू

डामणिपदधत्तेयोदेवंरविमागतं·सतांकार्यातिथेयीतिनिबोधयन्गृहमेधिनः॥३१॥अत्रसमागतंरविंशिरसा संभावयतुदयावलःस्वनिष्टयारविधारणक्रिययासमागतानांसतामेवंगृहमेधिभिरातिथ्यंकार्यमितिसदर्थंबोधयन्निबद्धइतिसदर्थनिदर्शना॥अत्रकेचिद्वाक्यार्थवृत्तिपदार्थवृत्तिनिदर्शनाद्वयंअसंभवद्वस्तुसंबंधनिबंधनमितितृतीयातुसंभवद्वस्तुसंबंधनिबंधनेतिवक्ष्यवक्ष्यन्ति॥तथाहि॥आद्यनिदर्शनायांवाक्यार्थयोरैक्यमसंभवतयोःसाम्यंपर्यवस्यति॥द्वितीयनिदर्शनायामपिअन्यधर्मोन्यत्रासंभवतधर्मिणोःसाम्यंपर्यवस्यति॥तृतीयनिदर्शनायांतुस्वक्रिययापरान्प्रतिसदसदर्थबोधनंसंभवदेवसमतांगमःकरोतीति॥बोधयन्गृहमेधिनइत्यादौहिकारीषोग्निरध्यायतीतिवत्समर्थोवृणेणिचुःप्रयोगः॥ततश्चयथाकारीषाग्निःशीतापनयनेनबहूध्ययनसमर्थान्करोतिएवंवर्ण्यमानःपर्वतःस्वयमुपमानभावेनगृहमेधिनउक्तबोधनेसमर्थान्कर्तुंक्षमते॥यथायंपर्वतःसमागतरविंशिरसासंभावपतिएवंगृहमेधीसमागतंसंतमुचितपूजया

॥१९॥

संभावयेदितिअतःसंभावितिबोधनसंबंधइति॥२०॥व्यतिरेकोविशेषश्चेदुपमानोपमेययोः॥शैलाद्योन्नताःसंतःकिंतुप्रकृतिकोमलाः॥३३॥अयमुपमेयाधिक्यपर्यवसापीव्यतिरेकः॥यथावा॥पल्लवनःकल्पतरोरेषविशेषःकरस्यतेवीर॥भूषयतिकर्णमेकःपरस्तुकर्णंतिरस्कुरुते॥३४॥तन्यूनत्वपर्यवसायीयथा॥रक्तस्त्वंनवपल्लवैरहमपिश्लाघ्यैःप्रियायागुणैस्त्वामाप्यांतिशिलीमुखाःस्मरधनुर्मुक्तास्तथा स्मरेत्वामपिकांतापादतलाहतिस्तवमुदेतद्वन्मात्रावयोःसर्वतुल्यमशोककेवलमहंधात्रासशोकःकृतः॥३४॥अनुभयपर्यवसायीयथा॥दृढतरनिबद्धमुष्टेःकोपेनिषण्णस्यसहजमलिनस्य॥कृपणस्यकृपाणस्यचकेवलमाकारतोभेदः॥३५॥सहोक्तिःसहभावश्चेद्वासतेजनरंजनः॥दिगंतमगमत्तस्यकीर्तिःप्रसभंसह॥३६॥यथावा॥छायासंश्रयतेतलंविटपिनांश्रांतेवपांथैःसमंमूलंयातिसरोजलस्यजहतांग्लानेवमीनैःसहः॥अनेनमहिमांशुरीधितिरपस्तमवलोकैःसमंनिद्रागर्भगृहंसहप्रविशतिक्लांतेचकांताजनेः॥३७॥जनरंजनरक्तकेःअनेनसार्द्धंविहरांबुराशेरित्यादौनसहोक्तिरलंकारः॥विनोक्तिश्चहिनाकिंचित्प्रस्तुतंहीनमुच्य

विद्याहृद्यापिसावद्याविनाविनयसंपदं॥३८॥यथावा॥यश्चरामंनपश्येत्तुयंचरामोपश्यति॥निंदितःस
भवेल्लोकेस्वात्मायेनंविगर्हयेत्॥३९॥अत्ररामदर्शनंविनानिंदितत्वंविनाशब्दमंतरेणापिप्रदर्शितं॥त
त्रेकिंविहिनारम्यंविनोक्तिःसापिकथ्यते॥विनारवैर्विभात्येषाराजेंद्रभवतःसभा॥४०॥यथावा॥
आविर्भूतेशशिनितमसामुच्यमानेवरात्रिर्नैशस्यार्चिर्हृतिमुजइवच्छिन्नभूयिष्ठधूमा॥मोहेनोत्तर्वरतनु
रिपंलक्ष्यतेमुक्तकल्पागंगारोधःपतनकलुषाग्रहतीवप्रसादं॥४१॥अत्रतमःप्रभृतीनिविनोनि
शादीनांरूप्यत्वंविनाशब्दमंतरेणादर्शितं॥समासोक्तिःपरिस्फूर्तिप्रस्तुतःप्रस्तुतस्यचेत्॥अयमेंदुर्मुखंप
श्यरक्तश्चुंबतिचंद्रमाः॥४२॥यत्रप्रस्तुतवृत्तांतेवर्ण्यमानेविशेषणसाम्यबलादप्रस्तुतस्यवृत्तांतस्यापिपरि
स्फूर्तिस्तत्रसमासोक्तिरलंकारः॥समासेनसंक्षेपेणप्रस्तुताप्रस्तुतवृत्तांतयोर्वर्णनात्॥उदाहरणमयमेंदुरि
त्यत्रचंद्रस्यप्रायोप्रारंभसंबंधलक्षणेउद्येवर्ण्यमानेमुखशब्दस्यप्रारंभवदनसाधारण्याद्रक्तशब्दस्यारुण
कामुकसाधारण्याच्चुंबतीत्यस्यप्रस्तुतार्थसंबंधमात्रपरस्यरक्त्यार्थीत्तरसाधारण्याच्चंद्रमाःशब्दगतश्लि

॥२०॥

गेनरेंदीगतस्त्रीलिंगेनतत्पतिपार्थेइसंबंधित्वेनयस्तुतप्रस्तुतपरयोनितासत्कपुरुषवृत्तांतःप्रतीयते॥य
थावा॥व्यालोबेल्लुचभारमाकुलकचंव्याहल्लोहलहारावलिप्रेखत्कुंडलघोमिगंडयुगलंप्रस्विदिवक्त्रो
बुजम्॥रासवृत्तकरप्रहारमधिकश्वासंरसादेतयायस्मात्कंदुकसादरंकभगयासंसेयसेतत्कृती॥४३॥अत्रेकं
दुकवृत्तांतेवर्ण्यमानेव्यालोबेल्लुचभारमित्यादिक्रियाविशेषणसाम्यात्विपरीतरतासक्तनायकवृत्तांतः
प्रतीयते॥पूर्वत्रविशेषाणिश्लिष्टानिहेतुसाधारणानीतिभेदः॥सारूप्यादयिसमासोक्तिरिष्यते॥यथा॥पु
रायत्रस्रोतःपुलिनमधुनातत्रसरितांविपर्यासंयातोघनविरलभावःक्षितिरुहां॥बहोर्दृष्टंकालादपरमिवम
न्येवनमिदंनिवेशःशैलानांतदितिबुद्धिर्दृढयति॥४४॥अत्रवनवर्णनेप्रस्तुतेतत्सारूप्यात्कुटुंबिपुरुषधनसं
तानादिसमृध्यसमृद्धिविपर्यासंप्राप्तस्यतत्समाश्रयस्यग्रामनगरादेर्वृत्तांतःप्रतीयते॥अत्रचविशेषणसाम्यात्
सारूप्याद्यदप्रस्तुतवृत्तांतस्यप्रस्तावनंतत्कृतेविशेषतत्समारोपार्थं॥सर्वथैवप्रस्तुतानन्वयिनःकविमरं
भगोचरत्वायोगात्॥ततश्चसमासोक्तावप्रस्तुतव्यवहारसमारोपश्चारुतायाहेतुः॥ननुरूपकेऽपिप्रस्तुतेऽप्रस्तुतरू

पसमारोप्यास्ति॥मुखचंद इत्यत्र मुखेचंद इतारोपहेतुचंद्रपदसमभिव्याहारश्च इक्षुभक्षतिचंद्रमाइत्यादि समासोक्युदाहरणेचंद्रादेर्जारत्वाद्यारोपहेतोस्तद्वाक्यपदसमभिव्याहारस्याभावात्॥निरीक्ष्यविघुन्नयनैः पयोदोमुखंनिशायामभिसारिकायाः॥धारानिपातैःसहकिंतुयांतश्चेदेयमित्यंतरंरासे॥४५॥इत्या द्येकदेशविवर्तिरूपकोदाहरणइवप्रस्तुतेप्रस्तुतरूपसमारोपगमकस्याप्यभावात्॥तत्राविघुन्नयनैरित्यत्र निरीक्षणानुगुण्यादुत्तरपदार्थप्रधानमयूरव्यंसकादिसमासव्यवस्थितेरुत्तरपदार्थभूतनयनान्वयानुरो धात्पयोदेःकृष्णमपिइष्टपुरुषत्वरूपणंगम्यमुपगम्यते॥नचेहतथानिरीक्षणवत्त्वव्यागतेःकिमितिनेष्यतए वसिंधु रितिश्लोकेसेतुत्वादिवच्चाप्रस्तुतासाधारणधर्मोत्तरपदार्थोस्तिनापिश्लिष्टसाधारणादिविशेषणसम र्पितयोःप्रस्तुताप्रस्तुतवृत्तान्तयोरप्रस्तुतवृत्तांतस्यविघुन्नयनवत्साधान्यमस्तियेनतदनुरोधात्।तंसेतुम थस्तुदिवत्रेपयोदइत्यत्रेववानुकूलमपिप्रस्तुतेःप्रस्तुतरूपसमारोपमभ्युपगछेम॥तस्माद्विशेषणसमर्पिताप्र स्तुतव्यवहारसमारोपमात्रमिहचारुताहेतुः॥यद्यपिप्रस्तुताप्रस्तुतवृत्तांतयोरिहश्लिष्टसाधारणविशेषणसम

र्पितयोर्भिन्नपदोपात्तविशेषणयोरिवविशेष्येणैवसाक्षादन्वयादस्तिसमप्राधान्यंतथाप्यप्रस्तुतवृत्तांतान्वयानु रोधान्नप्रस्तुतेःप्रस्तुतरूपसमारोपोंगीकार्यः॥तथाहि॰यथाप्रस्तुतविशेष्येनारूढप्रस्तुतवृत्तांतस्यान्वययोग्य तातथैवाप्रस्तुतेपिजारादौनास्तिप्रस्तुतवृत्तांतस्यान्वययोग्यताः॥एवंचसमप्रधानयोःप्रस्तुताप्रस्तुतवृत्तांतयो रन्यतरस्यावश्यकसमारोपेभ्युपगंतव्येयश्चतएवप्रस्तुतेःप्रस्तुतवृत्तांतस्यारोपस्यचारुताहेतुरितियुक्तं॥ननुचैवं सतिविशेषणसाम्यातत्रप्रस्तुतस्यगम्यत्वेसमासोक्तिः॥विशेषणानांसाम्येनयत्रप्रस्तुतवर्त्तिनां॥अप्र स्तुतस्यगम्यत्वंसासमासोक्तिरित्यतइत्यादीनिप्राचीनानांसमासोक्तिलक्षणानिनसंगछेरन्॥प्रस्तुतश्लि ष्टसाधारणादिविशेषणसमर्पितानुरागपूर्वकंवदनचुंबनाद्यप्रस्तुतवृत्तांतसमारोपमात्रस्यचारुताहे तुत्वाभ्युपगमनविशेषणसाम्यकृतकामुकाद्यप्रस्तुतधर्म्यंजनानपेक्षणादिति चेत्॥उच्यते॥स्वरूपतोऽ प्रस्तुतवृत्तांतस्यारोपोनचारुताहेतुः॥किंचप्रस्तुतकामुकादिसंबंधित्वेनावगम्यमानंस्यतस्यारोपः॥त

थाभूतस्येवरसानुगुणत्वात्॥ नचतावदवगमनेविशेषणपदानांसामर्थ्यमस्तिअतःश्लेषादिमहिम्नाविशेषण
पदैःस्वरूपतःसमर्पितेनवदनचुंबनादिनातत्संबंधिनिकामुकादौअभिलषेपुनस्तदीयत्वानुसंधानेतत्रभवति॥
स्वरूपतोदृष्टेनराजाश्वादिनातत्संबंधिनिराजादौस्मारितेपुनरश्वादौतदीयत्वानुसंधानवदितिविशेषणसाम्य
नवाच्योपस्कारकस्याप्रस्तुतस्यंजनेस्यारूपेपसा॥ अतएवश्लिष्टविशेषणायामिवसाधारणविशेषणायामप्य
प्रस्तुतव्यवहारसमारोपइत्येवप्राचीनानांप्रवादः॥ कंदुकेव्यावलकुचभारत्वादिविशिष्टवनितासेव्यत्वस्यकामुक
संबंधित्वेनवसमारोपणीयत्वात्॥ स्वरूपतःकंदुकेपितस्यसत्वेनासमारोपणीयत्वात्॥ किंच॥ सारूप्यनिबंधनत्वेना
दाहृतायांसमासोक्तावप्रस्तुतवृत्तांतस्याशब्दार्थस्याप्रस्तुतरूपेणैवगम्यतयेतनरूपेणतस्यसमारोपसिद्धे
रन्यत्रापितथैवयुक्तमितियुक्तमेवप्राचीनानांलक्षणमितिविभानीयं॥ अलंकारःपरिकरःसामिप्रायेविशे
षणे॥ सुखंधांशुकलितोनंसस्तापंहरतुवःशिवः॥४७॥ अत्रसुधांशुकलितोनंसइतिविशेषणंतापहरण

सामर्थ्यामिप्रायं॥ यथावा॥ तवप्रसादात्कुसुमायुधोपिसहायमेकंमधुमेवलब्ध्वा॥ कुर्याद्धरस्यापिपिनाक
पाणेर्धैर्यच्युतिंकेममधन्विनोन्ये॥४८॥ अत्रपिनाकपाणेरितिहरविशेषणंकुसुमायुधइत्यर्थलभ्याहम
र्थविशेषणंचसारासारायुधत्वामिप्रायगर्भम्॥ यथावा॥ सर्वंशुचिनिधानस्यकृतघ्नस्यविनाशिनः॥ प्र
शरीरकस्यापिकृतेमूढाःपापानिकुर्वते॥४९॥ अत्रशरीरविशेषणानित्यहेयत्वेनासंरक्षणीयत्वामि
प्रायगर्भाणि॥ यथावा॥ व्यास्थंनेकतयास्थितंश्रुतिगणंजन्मीनवल्मीकतोनाभीनाभवमच्युतस्यसुमहद्ब्रा
ह्मंचनाभाविषि॥ चित्रार्थंनिरहंकथामवकथंसुत्राणिनासंपरुद्देवद्रुणेचंदवर्णनमहंकुर्वेकथंशाकु
न्तत्रश्रुतिगणंनव्यास्थपित्यादीनिविशेषणानिस्वस्मिन्व्यासाद्यसाधारणकार्यकारणप्रतिषेधमुखेन
नाहंव्यासइत्यभिप्रायगर्भाणितत्राद्योदाहरणेएकंविशेषणं॥ समनंतरयोःप्रत्येकंबहूनिविशे
षणानि॥ तत्रापिप्रथमोदाहरणेसर्वाणिविशेषणान्येकाभिप्रायगर्भाणिपदार्थरूपाणिच॥ द्वितीयोदाहरण

भिन्नभिन्नाभिप्रायगर्भाणिवाक्यार्थरूपाणि चेतिभेदः॥तेषुवाक्यार्थसङ्गावेपिनधर्मिव्यपदेशः॥ता
पहरणेमन्मथस्यकेसुसन्न्यायेनसर्वधन्विधैर्यभंजकत्वेशरीरसंरक्षणार्थंपायमाचरतांमूढत्वेस्वस्यवर्णनी
यराजगुणकथनाशक्तत्वेचवाक्यएवोपस्कारकत्वादतएवव्यंग्यार्थस्यवाच्यपरिकरत्वंपरिकरइतिनामा
स्यालंकारस्य॥केचित्तुनिष्प्रयोजनविशेषणेपादानेपुनरुक्तदोषस्योक्तत्वात्सप्रयोजनंत्वविशेषण
स्यदोषाभावमात्रेणकश्चिदलंकारः॥एकनिष्ठतादर्शनेकविशेषणोपन्यासः॥परेत्वेवंविधविशेषात्परिकरइ
त्यलंकारमध्येपरिगणितइत्याहुः।वस्तुतस्तत्रानेकविशेषणोपन्यासएवपरिकरइतिनियमः॥श्लेषयमका
दिघटितपुनरुक्तदोषाभावेनतत्रैकस्यापिविशेषणस्यसाभिप्रायस्यविन्यासेविच्छित्तिविशेषसङ्गावात्परिक
रत्वोपपत्तेः॥यथा॥अतियजेतनिजांयदिदेवतांसुभयतश्चयतेजुषतेघृणाक्षितिभृतेवसदेवतकांवयंवनग
तानवताकिमहिंसिता॥अत्रपुरुद्भूतपूजोघुक्तान्नदादीन्प्रतिभगवतः कृष्णस्यवाक्येगोवर्द्धनगिरिरेवास्माकं

लक्ष्यमाश्रयन्भंगुरागुणाः।अत्रकमलनालरत्नांतकीर्तनंतस्रुवेवहिःखलेषुजाप्रस्कन्नात्पुत्रादिभिरंतः कलहंकुर्वाणेपुरु
षेपर्यवस्यति॥एवंचलक्ष्यलक्षणयोः प्रशंसाशब्दः स्तुतिनिंदात्वरूपाख्यानसाधारणकीर्तनमात्रपरोद्रष्टव्यः।सामान्य
निबंधनायथा॥विधायवैरंसामर्षनरोरोषउदासते॥निक्षिप्योदक्षिणंकक्षेरोरतेतेमिमारुतं॥अत्रप्रागेवसामर्षत्रिशुपाले
रुक्मिणीहरणादिनावैरंदीकृतवताकृष्णेनतस्मिन्नुदासितुमयुक्तमितिविशेषवक्तव्येपस्कृतेतत्प्रयोजनायैवसामान्यम
भिहितं।यथावा॥सोहार्दस्वर्णरेखाणामुद्भावनमिदानुषां।परीक्षमितिकोयस्तिपरीक्षानिकषोपलः॥अत्रयादृशंप्रयुक्तइव
परोक्षेपिममहत्माचरतितादृशमुत्तमसमुद्दिष्टविशेषवक्तव्येनप्रस्कृतेसामान्यमभिहितं।विशेषनिबंधनायथा।अं
कारोपितमृगश्चंद्रामृगलोचनः॥केसरीनिष्ठुरक्षिप्तमृगयूथोमृगाधिपः।अत्रकृष्णंप्रतिबलभद्रवाक्येमार्दवदूषणपरे
पूर्वप्रस्तावानुसारेणक्रूरएवख्यातिभाग्भवतिनतुमदुरितिसामान्येनवक्तव्येतत्प्रत्यायनार्थमप्रस्कृतोविशेषोभिहितः।एवंरक्षु
थादिपुसामान्यतः कंचिदर्थंप्रस्कृत्यतद्विरणार्थंअप्रस्कृतकथाविशेषोदाहरणेष्वियमेवाप्रस्कृतप्रशंसादृष्टव्या॥कारणनिबं
धनायथा॥हृतसारमिवेंदुमंडलंदमयंतीवदनायवेधसा॥स्तनमध्यविलंबिलोचनेधृतगंभीरवनीरवनीलिम॥अत्राप्राकारणिकं
दुमंडलगततयोत्प्रेक्ष्यमाणंदमयंतीवदननिर्माणार्थंसारांशहरणेनकारणेनतत्कार्यरूपोवर्णनीयतयाप्रस्कृतोदमयंतीवदनगतोलो
कोत्तरसौंदर्यविशेषः प्रतीयते।अथवामदीयेवरदराजस्तवे।आश्रितेनूनममृतद्युतयःपदंतेदेहसंयोपनतद्दिव्यपदाभिमुख्याः।लाव

रूपपुरायनिचयंसुहृदित्वदास्येविन्यस्यतिमिहिरंप्रतिमासमिन्नाः॥अत्राप्राकरणिकचंद्रकर्तृकतयोत्प्रेक्षमाणेनलावण्यपुण्यनिचयविभासेनकारणेनतत्कार्यमनंतकोटिचंद्रलावण्यशालित्वमनन्यसुखसाधारणंभगवन्मुखेवर्णनीयतयाप्रस्तुतंप्रतीयते॥तथाहि॥चंद्रस्यावन्मंत्रलिंगाद्दृष्टिसयाध्योभेदाध्यवसायाद्वाप्रतिमासंभिन्नत्वेनवर्णितःतेनातीताश्चंद्राअनंतकोट्यइतिलब्धं॥कालस्यानादित्वात्॥सर्वेषांचतेषामाकाशसमाश्रयणंश्लेषमहिम्नाभगवच्चरणसमाश्रयणेनाध्यवसितं॥भगवच्चरणप्रपन्नानंददृक्षयोपस्थितोपरमपदप्राप्त्यभिमुख्यंतदानीमेवस्वसुहृद्भिर्स्वकीयसुकृतस्तोमनिवेशनंततःसूर्यमंडलप्राप्तिश्चेयतत्सर्वंश्रुतिसिद्धमितिदनुरोधेनेतिपंददृक्षयकालस्यामावास्यारूपस्योपस्थितौसूर्यमंडलप्राप्तेःप्राक्प्रसक्षसिद्धपुरापत्येननिरूपितस्यलावण्यस्यग्रहणंनिमित्तीकृत्यतस्यचंद्रसादृश्यरूपोपचरितंतत्सौहार्दवतिभगवन्मुखन्यसनमुत्प्रेक्षितंयद्यपिसुहृद्धेतेनावत्स्वल्पुरापसंक्रमणंभवतितथाप्यत्रसुहृदेकवंभगन्मुखमेवचंद्रस्यसुहृद्भूतंनमुखांतराणिचंद्रसादृश्यगंधस्याप्यनास्पदानीतिभगवन्मुखस्येतरमुखेभ्योव्यतिरेकोपिव्यंजितः।ततश्चतस्मिन्नेवसर्वेषांचंद्राणांस्वस्वयावल्लावण्यपुण्यविन्यसनोत्प्रेक्षणेनग्राह्यविशिष्टःप्रस्तुतोर्थःस्पष्टमेवप्रतीयते॥यद्यपिक्रमोसूर्यमंडलप्राप्त्यनंतरभाविविरजातिक्रमणानंतरमेवसुहृत्सक्रमणंश्रूयतेतथापिशारीरकशास्त्रेतत्स्यार्थवशात्तदभावःस्थापितइतिदनुसारेणविन्यस्यमिहिरंयांतीत्युक्तं॥कार्यनिबंधनायथा॥नाथत्वदंघ्रिनखधावनतोयलग्नास्तत्कांतिलेशकलिकाजलधिंप्रविष्टाः॥ताएवतस्यमथनेनघनीभवंत्योनूनंसमुद्गवनीतपदंप्रपन्नाःअत्रभगवत्पादांबुजक्षालनतोयरूपायोदिव्यसरितिअलक्तकरसादिवल्लग्नानांतयासहसमुद्रंप्रविष्टानांनखकांतिलेशकणिकानांपरिणामतयासंभाव्यमानेनसमुद्गनवनीतपदवाच्येनचंद्रेणकार्येणतत्रैवकांत्युत्कर्षःप्रतीयते॥यथावा॥अस्याश्चेदृतिसोकुमार्यमधुनाहंसस्यगर्वैरलंसंलुप्तोयदिसाध्यतांपरभृतेर्वीर्यंमतंवरं॥अंगानामकठोरतामदृषतांयेनसामालतीकांतिश्चेत्कमलाकिमत्रयदुनाकाषायमालंबतां॥अत्रनखिकागत्यादिपुवर्णनीयतेनप्रस्तुतेषुहंसादिगतगर्वशांत्यादिरूपाणिऔचित्येनसंभाव्यमानानिकार्याणिक्रमेणाभिहितानि॥एतानिचपूर्वोदाहरणइवनवस्तुकार्याणिकिंतुतन्निरीक्षणकार्याणि॥लज्जातिरश्चांयदिचेतसिस्यादसंशयंपर्वतराजपुत्र्योः॥तंकेशपाशंप्रसमीक्ष्यकुर्युर्बलिप्रियत्वंशिथिलंचमर्यइत्यादुदाहरणांतरेतथैवस्पष्टं॥अंगानामकठोरतांतत्तुलयतोयदुवर्णनीयांगसोकुमार्यातिशयनिरीक्षणकार्यत्वमपिनार्थमालतीकठोरत्वविवक्षितंप्रतिषेधविशेषापेक्षकठोरत्वस्यतदकार्यत्वात्॥किंतुतदुद्भेदएवात्रदमयितुंगमादिवदृष्टइत्युदाहरणेतथैवस्पष्टं॥अर्थस्यकार्यत्वंवुद्धेःकार्यत्वेपिकार्यनिबंधनत्वंनहीयतइतितादृशान्यपिकार्यनिबंधनाप्रस्तुतप्रशंसायामुदाहृतानिप्राचीनैः॥वस्तुतस्तुतदतिरेकेपिनदोषःनह्यप्रस्तुतप्रशंसायाप्रस्तुताप्रस्तुतयोःपंचविधएवसंबंधइतिनियंतुशक्येतेसंबंधांतरेप्यपितदर्शनात्॥यथातायत्रयोपधपरस्तेवस्मितस्यनिश्वासमंदमरुताविधुतस्य॥एतेकरंकरचयाश्चयेप्रकीर्णाजेयात्कस्यकिरणाजगतिभ्रमं

ति॥ अत्रप्रस्तुतानां चंद्रकिरणानां भगवन्मंदस्मितरूपदिव्यौषधधान्यविशेषकरंकरचयतोत्रेक्षणेनभगवन्मंदस्मितस्यतत्सा
रतारूपःकोयुत्कर्षःप्रतीयते।तद्धधान्यकरंकरचययोःकार्यकारणभावादिसंबंधोस्तिअतःसहोक्त्यादिकमपिसंबंधांतर
माश्रयणीयमेवंसर्वत्रसुषमानोपमेयावाश्रियतत्रकविकल्पितकार्यकारणभावनिबंधेअप्रस्तुतप्रशंसेदर्शिते॥ततोन्यथा
पिदृश्यते॥यथा॥कालिंदिब्रूहिकुंभोद्भवजलधिहंनामह्लासिकस्माच्छत्रोर्मेनर्म्मदाहंत्वमपिवदसिमेनमकस्मात्सपत्न्याः
लिन्यंतर्हिकस्मादनुभवसिमिलत्फेनजालैर्मौलवीनांनेत्रोभोभिः।किमसांसमजनिकुपितःकुंतलेशोणिपालइत्रत्रकिमासांसमज
नीतिमावीनांतथारोदनस्यनिमित्तेनेष्टेतस्मियमरणरूपनिमित्तमनाख्यायकुपितःकुंतलेशोणिपालइतितत्कारणमभिहितमित्ते
कारणनिबंधना॥मालवान्प्रतिप्रस्थितेनकुंतलेश्वरेणकिंतेनिर्जिताइतिपृष्टेनदूधानंतरभाविजलविधिनमदाप्रभोनररूप
कार्यमभिहितमित्यत्रैवकार्यनिबंधनापिपूर्वस्यांप्रश्नःशब्दःअस्यार्थइतिभेदः।प्रस्तुतेनप्रस्तुतस्यद्योतनेप्रस्तुतां
कुरः॥किंभृंगससांमालसांकेतक्याकंटकेदृया॥यत्रप्रस्तुतेनवर्ण्यमानेनाभिमतमन्यत्प्रस्तुतंद्योत्यतेतत्रप्रस्तुतांकुरो
लंकारः।उत्तरार्द्धमुदाहरणंइहप्रियतमेनसाकमुद्यानेविहरंतीकाचित्भृंगंप्रत्येवाहेतिवाच्यार्थस्यप्रस्तुतत्वं॥तच्चानामंत्रणीया
मंत्रणेनवाच्यासंभवात्प्रस्तुतमेववाच्यमिहससरूपप्रस्तुतावगतयेनिर्दिष्टमितिवाच्यं॥मोत्यादिनाभृंगादावप्यामंत्रणस्यलाकर
शीनात्॥यथा॥कस्त्वंभोःकथयात्मिदैवहतकंमांविद्धिसाकोटकंवैराग्यादिवक्षिसाधुविदितंकस्मादिदंकथ्यते॥नामेनात्र

दिनाक्रमेणोदाहरणानि॥ तत्र सर्वदोमाधवइतिश्लोकत्रयेणप्रकृतयोर्हरिहरयोः कीर्तनंप्रकृतश्लेषः॥ अङ्कंकमलमङ्गश्चंद्रस्त्र्याख्यमानमात्रत्वेनाप्रकृतयोः कीर्तनमित्यप्रकृतश्लेषः। वाहिनीपतिः सेनापतिः समुद्रश्चतत्रसमितोरात्रप्रयातोत्थदुधिरस्यसेनापतेरेववर्णनंप्रकृतमितिप्रकृताप्रकृतश्लेषः॥ यथावा॥ त्रातःकाकोदरोयेनइक्ष्वाकुपिकरुणात्मना॥ पूतनामारणख्यातःसमेस्तुहरणंविभुः॥ नीतानामाकुलीभावंलघ्वेभ्रिरिलीमुखैः॥ सदृशैवनवृद्धानांकमलानांत्वदीक्षणं॥ अत्रसाधुरयमारूढःकांतिमान्नरकमंडलः॥ राजाहरतिलोकस्यहृदयंमृदुभिःकरैः॥ अत्राद्येस्तोत्र्येनप्रकृतयोरामकृष्णयोःश्लेषः॥ द्वितीयेउपमानत्वेनाप्रकृतयोःपद्महरिणयोःश्लेषः॥ तृतीयेरात्रिवर्णनप्रस्तावेप्रकृतस्यप्रत्यग्रोदितचंद्रस्याप्रकृतस्यनवाभिषिक्तनृपतेश्चश्लेषः॥ यत्रप्रकृताप्रकृतश्लेषोदाहरणेशब्दशक्तिमूलध्वनिमिछतिप्रोचुस्तत्प्रकृताप्रकृताभिधानमूलकस्यउपमादेरलंकारस्यव्यंग्यत्वाभिप्रायं॥ अप्रकृतार्थस्यापिशक्त्याप्रतिपाद्यस्याभिधेयत्वावश्यंभावेनव्यक्त्यनपेक्षत्वात्॥ पद्यपिप्रकृतार्थप्रकरणबलादेवइतिबुद्धिस्थेसत्यवश्यान्नृपतिर्भूद्यधनादिवानिंराजकरादिप्रदानेअन्योन्यसंनिधानबलात्तत्तद्विषयशक्त्यंतरोन्मेषपूर्वक

प्रकृतार्थःस्फुरेत्तेनावतात्तस्यव्यंग्यत्वं॥ शक्त्याप्रतिपाद्यमानेसर्वथैवव्यक्त्यनपेक्षणात्॥ पर्यवसितेप्रकृतार्थाभिधानेपश्चात्स्फुरतिचेत्कामंगूढश्लेषोभवतुनास्तिवान्यत्रापिगूढश्लेषः॥ यथा॥ अयमतिजरठाःप्रकामसुंदरलघुविलंबिपयोधरोयरुद्धाः॥ सततमसुमतामगम्यरूपाःपरिणतदिक्करिकास्तदीदृशीर्भीः॥ मंदमग्निमधुरर्यमोपलादर्शितश्चयथुवाभवतमः॥ दृश्यसिमिरजंसिधेविदोषुमोषधियतेरसन्निधौ॥ अत्रहिसमासोक्युदाहरणयोः प्राकरणिकेर्थेप्रकरणवशाद्बुद्धिस्थविशेषणसाम्यादप्रकृतोपिबुद्धेविषयीकृतोतादृक्प्रतीयते॥ तत्रसमासोक्तेरंगंश्लेषइतिसर्वेषामभिमतम्॥ एवमन्यत्रापिगूढश्लेषेध्वनिर्बुद्धिर्नकार्या॥ यथा॥ रम्याइतिप्रावृषेण्यःपताकारागंविविक्ताइतिवर्द्धयंतीः॥ श्यामास्वेवंतनमद्भीकाःसंवधूभिर्वलभीर्युवानः॥ अत्रद्वितीयांतादिविशेषणसमर्पितार्थेतरांणांनशब्दसामर्थ्येनधूमिरन्यविभक्तेरभेदात्॥ नचविभक्तिभेदेपितदन्वयाक्षेपकंसाधर्म्यमिहानिबद्धमस्तियतःएतस्मिन्नधिकपदःश्रियंवहंत्यःसंक्षोभयेवनप्रसूनजेवनीताःवाल्मीकेरहितरामलक्ष्मणानांसाधर्म्यंदधतिगिरांमहासरस्यइत्रवासिश्लेषोभवेत्समभिव्याहृतक्रियाविशेषणंसहार्थत्वेनाप्युपपन्नंबंधूश्लेषविशेषणार्थान्वयात्प्राङ्गप्रतीतंसाम्यार्थंनालंबतेतस्मादर्थसौंदर्यबलादेवतदन्वयानुसंधानमितिगूढश्लेषेपृथगनुतद्बलादेवसमशब्दस्यसाम्यार्थकल्पनमितिकाचस्यैवोपमालंकारस्यांगमयंश्लेषस्यबलमतिप्रपंचेन॥ तस्मिंद

श्लेषत्रैविध्यं॥एवंचश्लेषःप्रकारांतरेणापिद्विविधःसंपद्यतः।उदाहरणगतेषुअत्रकीलालवाहिनीसादिशब्देषुपरस्परंविलक्षणंपदभंगं
मनपेक्ष्यनानार्थक्रोडीकारादभंगश्लेषः।सर्वेदोमाधवोयेगंगाहरिणाहितसक्तेनेत्यादिषुपरस्परविलक्षणंपदभंगमपेक्ष्यनाना
र्थक्रोडीकारात्सभंगश्लेषइति॥तत्रसभंगश्लेषःशब्दालंकारःअभंगश्लेषस्त्वर्थालंकारइतिकेचित्॥उभयमपिशब्दालंकारइ
त्यन्येउभयमपिअर्थालंकारइतिस्वामिप्रायः।एतद्विवेचनंतुचित्रमीमांसायांद्रष्टव्यं॥अप्रस्तुतप्रशंसायास्तायत्रप्रस्तुतभवाय
एकःकृतीशुकंतेषुयोन्यंशक्नन्नयाचते॥यत्राप्रस्तुतवृत्तांतवर्णनंप्रस्तुतावगतिपर्यवसायितत्रप्रस्तुतप्रशंसालंकारः॥अत्र
प्रस्तुतवृत्तांतवर्णनेनप्रस्तुतावगतिश्चप्रस्तुतप्रस्तुतसंबंधेसतिभवतिसंबंधश्चसारूप्यंसामान्यविशेषभावःकार्यकारणभा
वोवासंभवति॥तत्रसामान्यविशेषभावेसामान्याद्विशेषस्यविशेषात्सामान्यस्यवगतौद्वैविध्यं॥कार्यकारणभावेपिकार्यात्कारणस्यका
रणाद्वाकार्यस्यावगतौद्वैविध्यं॥सारूप्येत्वेकोभेदस्यस्याःपंचप्रकारः॥पदाहुः।कार्येनिमित्तेसामान्येविशेषेप्रस्तुतेसति॥तदन्यस
वचस्तुल्येतुल्यस्येतिचयंवधेति॥तत्रसारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणंएकःकृतीति॥अत्राप्रस्तुतस्यवक्तुकस्यप्रशंसाप्र
शंसनीयेनप्रस्तुतेतत्सरूपेरूढेभ्योयाचनाविरुद्धेमानिनिपर्यवस्यति॥यथावा॥आवद्धकृत्रिमसटाजटिलंसमिनिरोपितो
मृगपतेःपदवीयदिश्वा॥मत्तेभकुंभतटपाटनलंपटस्यनादंकरिष्यतिकथंहरिणाधिपस्य॥अत्रशूनकस्यनिंदानिंदनीयत्वेनप्रस्तुतेत
त्सरूपेरूढिमेवेषव्यवहारमात्रेणविद्वत्तामभिनयतिवैधेयेपर्यवस्यति॥यथावा॥अंतःछिद्राणिभूयांसिकंटकाबहवोबहिः।कथंकमलेना

वटस्तमध्वगजनःसर्वात्मनासेवतेनच्छायापिपरोपकारकरणीमार्गेस्थितस्यापिमेदृश्यत्रचेतनावेतनप्रश्नोत्तरनिर्णयागामंत्रण
स्यायंतमसंभावितत्वाभावात्॥एवंप्रस्तुतेनवाच्येनभंगोपालंभरूपेणपत्राःकुलवधाःसौंदर्याभिमानशालिन्याःक्रुद्धेन
पतिनेदुष्टायायांपरवनितायांवाटसर्वस्वापहरणसंकल्पदुरासदायांवावेश्यायांकंटकसंकुलकेतकीकल्पायां
प्रवर्तमानंस्वियतमंप्रत्युपालंभोद्योत्यते॥यथावा॥अन्यासुतावदुपमर्दसहासुभृंगलोलंविनोदयमनःसुमनोलतास
सु॥बालामजातरजसंकलिकामकालेव्यर्थंकदर्थयसिकिंनवमल्लिकायाः॥अत्रापुष्पानमध्यवर्तिभृंगंप्रत्ययमुपालंभ
इतिवाच्यार्थस्यापिप्रस्तुतत्वं॥इदंत्वप्रौढांवगनासुविद्यमानासुबालिकांरतयेकुरुषेतिकामिनिभृण्वतिकस्याश्चिद्वृ
द्धायाःवचनमितिनंप्रत्युपालंभोद्योत्यते॥यथावा॥कोरादंदमियंदधातिनलिनीकांदंवंवुक्षतंधत्तेचूतलतानवंकि
शलयंपुस्कोकिलास्वादितं॥इत्याकर्ण्यमिथःसरोजनवधूःसादीर्घिकायास्तटेवेलांतेनतिरोधेदस्तनतटंविधारपा
णिना॥अत्रदृश्यमितिनलिनीव्यक्तिविशेषनिर्देशेनदीर्घिकायास्तटदृश्येनवाचार्थस्यप्रस्तुतत्वंस्पष्टं॥प्रस्तुतांतर
द्योतनंचस्वयमेवकविनात्राविरुद्धंउत्तरार्द्धे॥अत्राद्योदाहरणेरन्यायदेराध्वनिमाहलोचनकारः॥अप्रस्तुतप्रशंसायां
वाच्यार्थोऽप्रस्तुतत्वादवर्णनीयइतितत्राभिधायामपर्यवसितायांतेनप्रस्तुतार्थव्यक्तिरलंकारः॥इहतुवाच्यस्यप्रस्तुतत्वे
नतत्राभिधायांपर्यवसितायामर्थसौंदर्यबलेनाभिमतार्थव्यक्तिर्ध्वनिरेवेति॥वस्तुतस्तुअलंकारएवनध्वनिरितिव्यवस्थापि

तंचित्रमीमांसायां॥तत्रोदाहरणस्यलंकारलेकस्यापिनविवादः॥उक्तंहिध्वनिकृता॥शब्दार्थशरीरंतावत्काव्यंग्योर्थःकविनापुनः
यत्नाधिक्रियतेसोक्तयासोन्येवालंकृतिर्ध्वनेरिति॥एतामिसारूप्यनिबंधनान्युदाहरणानिसंबंधांतरनिबंधनान्यपिकथंचिद्दृश्य
यंग्ययोःप्रस्तुतत्वंमनोनोदाहरणीयानीतिदिङ्मात्रमुदाहृियते॥रात्रिःशिवाकाचनसंनिधनेविलोचनेजागृतमप्रमत्ता॥स
मानधर्मोयुवयोःसकाशेसखाभविष्यत्यविरेणकश्चित्॥अत्रनिशासारूप्यमिवतदेकदेशतयातद्व्यंग्यंभाललोचनत्वमपिशिव
रात्रिमाहात्म्यप्रयुक्तत्वेनवर्णनीयमितितन्मुखेनकल्पनिशासारूप्यंगम्यं॥यथावा॥वहंतीसिंदूरंप्रबलकबरीभारतिमिरत्वि
षांचक्रेदेवीकृतमिवनवीनार्कविरणं॥ततोतृक्षमंतस्तबवदनसौंदर्यलहरीपरीवाहस्रोतःसरणिरिवसीमंतसरणिः॥अत्रवे
र्णनीयत्वेनप्रस्तुतायाःसीमंतसरणेर्वदनसौंदर्यलहरीपरीवाहत्वोत्प्रेक्षणेनपरिपूर्णतटाकवत्परीवाहकरणीभूतास्रुस्थाने
अमांतोवदनसौंदर्यसमृद्धेःप्रतीयतेसापिवर्णनीयत्वेनप्रस्तुतैवेति॥यथावा॥अंगात्संनिमृणालकोमलयतेभृंगाविरेफा वलीनांकविशेषः
रुवंनासामोक्तकुमिंदनीलसरणिश्वासानिलादाहते॥इत्तेयंहिमबालकापिकुवेयोर्धनेक्षणंदीपतांतनायःपतितांधुवत्करत
लेधारंबुसलीपते॥अत्रनायिकायाविरहातिशयप्रकटनायसंतापकत्वंकार्यीकिमृणालमालिन्यादीन्यपिवर्णनीयत्वेनविव
क्षितानीतितन्मुखेनसंतापोवगम्यः।यत्रकार्यमुखेनकारणस्यावगतिरकिंचिदनन्नायमलंकारःकेवलमनुमानमेवायथा॥
परिम्लानापीनस्तनजघनसंगादुभयतस्तनोर्मध्यस्यांतःपरिमिलनमप्राप्तहरितं॥इत्यस्यास्प्रस्विथिलभुजापल्लवनतः कशांग्याः
संतापंवेदयतिनलिनीपत्रशयनं।तमुप्रस्तुतकार्यीभिधानमुखेनकारणस्यगम्यत्वमपिप्रस्तुतांकुरविषयश्चत्किंनहिपर्यायोक्तमित्याकां

क्षायामाह॥पर्यायोक्तंतदुगम्यस्यवचोभंग्यंतराश्रयं॥नमस्तस्मैकृतोयेनसुधाराहुवधूकुचौ॥पदेवगम्यंविवक्षितंतस्यैवभंग्यंतरेण
विवक्षितरूपादपिचारुतरेणकेनचिद्रूपांतरेणाभिधानंपर्यायोक्तं।उत्तरार्धमुदाहरणं॥अत्रभगवान्चारुदेवःस्वासाधारणरूपेणगम्यः
राहुवधूकुचवैयर्थ्यकारकत्वेनरूपांतरेणसएवाभिहितः॥यथावा॥लोकंपश्यतियस्यांघ्रिःसयस्यांघ्रिंनपश्यति॥ताभ्यामथपरिछ
द्यविद्यविश्वगुरोस्तव॥अत्रेगतमः पतंजलिश्चस्वासाधारणरूपाभ्यांगम्योरूपांतरेणाभिहितौ॥यथावा॥निवेद्यतांहंतसमाप्यतांतो
शिशीचकोशश्चदिमामिमानं॥पादौकियद्दूरमितोप्रयासेनिधिस्तनुच्छदयमनस्तवेति॥अत्रकिंयद्दूरंनिगमितेतिगम्यएवार्थरूपां
तरेणाभिहितः।यथावा।देवंवंदेजलधिदारधिंदेवतासार्वभौमंव्यासप्रज्ञाप्रभवनविदितायस्यवाताधिवाहाः।भूयायेटीभुवनमधरंप
क्वंपुष्पवाटीशटीपालाःशतमरवश्चंदनद्रुर्मनोभूः॥अत्रयस्यवेदवाहाभुजंगमाप्रणानीत्यादितत्तद्व्याख्यार्थस्यव्यवस्थितोवेदव्या
ख्यारेणावगम्याएववेदादयोव्यासप्रभुत्वविनेयत्वाधिकारेणाभिहिताःपरंतुदेवतासार्वभौमत्वस्फुटीकरणायविशेषणादिशेषंभा
वव्यासेनेतिपादिताः॥अलंकारसर्वस्वकृतापिपर्यायोक्तस्यसंप्रदायागतमिदमेवलक्षणमंगीकृतंगम्यस्यापिभंग्यंतरेणाभिधा
नंपर्यायोक्तमिति॥चक्राभिघातप्रसभद्रुमेवचक्रारमोराहुवधूजनस्यआलिंगनोद्दामविलासबंधंतरोत्सवंचुंबनमात्रेषंडतिप्राचीन
तदुदाहरणंत्वन्यथायोजितं॥राहुवधूगतेनविशिष्टेनरतोत्सवेनराहुशिरः छेदःकारणरूपोगम्यतइति।एवंचगम्यस्यैवाभिधान
मितिलक्षणनुपपन्नमांभंग्यंतरेणाभिधानायोगात्कार्यादिद्वारेणाभिधानंलक्षणेविवक्षितमितिलक्षणमपिक्लिष्टंगत्वा

योजितं॥लोचनकृतापिपर्यायोक्तीयदन्येनप्रकारेणाभिधीयतेइतिइदमेवलक्षणमंगीकृत्यतदुदाहरणेचकार्येणनाक्षिप्तेनकारणंवाक्यंसम्यक्प्रकाश्यतेतत्रसूक्ष्मंलक्ष्यनामकिंचिद्गत्यायोजितं॥वाच्यादन्येनप्रकारेणवाक्यंनोपलक्षितंसद्यदभिधीयतेतत्पर्यायेणप्रकारांतरेणवाक्यंनोपलक्षितमुक्तमितिसर्वोयंक्लेशः किमर्थमितिनविद्मः॥दर्शितानिहिगम्यस्यैवरूपांतरेणाभिधानेबक्त्रादयोदाहरणानिवक्राभिधानप्रसंगादयंवेतिबीजोदाहरणमपिस्वरूपेणगम्यस्यभगवतोरूपांतरेणाभिधानसंभवात्सुयोजमेव॥यत्तुतत्रराहुशिरश्छेदावगमनेतत्रागुक्तरीत्याप्रस्तुतांकुरएव।प्रस्तुतेनचराहोःशिरोमात्रावयवेषणालिंगनबंधत्वाधापादनरूपवाक्यंभगवतोरूपांतरेणउपपादितंतेनभगवतःस्वरूपेणावगमनंपर्यायोक्तस्यविषयः॥पर्यायोक्तंतदप्याहुर्यद्भाजनेष्टधर्मोनं॥यामिचूतलतांद्रष्टुंयुवाभ्यामास्यतामिह॥अत्रनायिकांनायकेनसंगमप्यचूतलतादर्शनव्याजेननिर्गंतुमास्यातत्स्वाभीष्टसंपादनरूपेष्टसाधनंपर्यायोक्तं॥यथावा॥देहिमत्कंदुकंराधेपरिधानंनिगूहितं॥इतिविस्रंसयन्नीवीमितस्ततःकृष्णोमुदेस्मवः॥पूर्वत्रपरेष्टसाधनंअत्रतुकंदुकसद्भावेशाधनार्थंनीवीविस्रंसनव्याजेनस्वेष्टसाधनमितिभेदः॥उक्तिर्व्याजस्तुतिर्निंदास्तुतिर्व्याजस्तुतिनिंदयोः कः स्वर्धुनिविवेकस्तुपापिनोनयसेदिवं।साधुवृत्तिपुनः साधकर्त्तयेकिमतः परं॥यन्मदर्थेविलूनासिदंतीपिनेश्वरपि॥निंदयास्तुतेः स्तुत्यानिंदायावावगम

नंव्याजस्तुतिः॥कःस्वर्धुनीसुदाहरणेविवेकोनास्तीतिनिंदाव्याजेनगंगास्तुतिवदेवमहापातकिनोपिस्वर्गेनयनान्निव्याजरूपयानिंदयातत्प्रभावातियेनस्तुतिः॥साधुवृत्तीत्युदाहरणेमदर्थंमियंतंक्लेशमनुभूतवत्सीव्याजरूपास्तुत्यादेमेर्थेनगतासिकिंनुरंतुमेवगतासिधृत्योवृत्तिकाधर्मविरुद्धकारिणीमितिनिंदावगम्यतेत्यथावा॥कस्तेदोषमदोयदुच्यैरुक्तिमास्थितेसप्तसप्तिसमारूढाभवंतिपरिपंथिनः॥अत्रेंद्रानयेवैरिणांजिगीषयाद्दष्टेवैरंगतेनीतिलेस्मरहराभवेसंमीलितंगासमरंवरंहरिकलानाथाधिपःस्मतंसवैरुत्यधीश्वरत्वमगमत्योमांचमिक्षादनं॥अत्रद्वोदाहरणेसप्तसप्तिपदगतश्लेषमूलनिंदाव्याजेनस्तुतिर्गम्यते॥द्वितीयोदाहरणेसर्वेश्वरोसीतिराजःस्तुत्योव्याजरूपयामदीयेदुष्टदारिभ्रादिसर्वज्ञानन्नपिबहुपदार्थेनरक्षसिदुःखेपिमद्दोक्तेमपिनदद्दासीतिनिंदायव्यंजते।सर्वमिदंनिंदास्तुत्योरेकविषयत्वेउदाहरणं॥भिन्नविषयत्वेननिंदास्तुत्यभिव्यक्तिर्यथा॥कस्त्वंवानररामराजभवनेलग्नार्थसंवाहकोयतःकुत्रपुरागतःसहनुमान्निर्दग्धलंकापुरः॥येद्वोराक्षससत्त्वनेतियहुनाःसंतार्जितस्तर्जितःसद्यीज्ञातपराभवोवनमगःकुत्रेतिनहायते॥अत्रहनूमन्निंदयाइतरवानरस्तुतिव्यक्तिःस्तुत्यानिंदामिव्यक्तिर्यथा।यद्भ्रूंमुहरीक्षसेनधनिनांदूषेनबाहूद्यमेषोनेपांगवैवयःश्रुणोषिनचतान्प्रसाद्यायाधावसि॥कालेबालतृणानिखादसिपरंनिद्रासिनिद्रागमेतन्मेब्रूहिकुरंगकुत्रभवताकिंनामोतप्ततपः॥अत्रहरिणस्तुत्यारूपेसवानिर्विस्मयत्वमनोनिंदाव्यज्यते॥अयमप्रस्तुतप्रशंसाविरोधरत्नालंकारसर्वस्वकारः।तेनाहिसारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणानंतरंवैधर्म्येणापिदृश्यते।यथा।धन्याःखलुवनेयाताःकल्हाराःसरश्चीतलाः।रामभिंदीवरश्यामंयेस्पृशंत्यनिवारिताः।अत्रयाताधन्याइत्यप्रस्तुतार्थादहमधन्याइतिवैधर्म्येणप्रस्तुतार्थःप्रतीयतइत्युक्तादितं।इयमेवप्रस्तुतप्रशंसाकार्यकारणादिनिबंधनेतिदंडीव

दाहरणम् अप्रस्तुतप्रशंसास्यादप्रकांडेऽनयास्फुटिः। सुरभिजीवंहेतिरिणावनेषपरसेधिनः॥अर्थैरयत्नस्फलमेजलदर्भांकुरादिभिः। सेयमप्रस्तुतेवात्रमृगशब्दनिःप्रशस्यते। राजानुवर्तनेकेनाभिधिष्णेनमेनस्विनेति। यत्प्रस्तुतस्यवक्ष्यमाणस्यव्याजस्फुटितिरित्येवमुक्तं॥स्फुटयतिनिंदामिव्यक्तिरित्यप्रस्तुतप्रशंसातोवैचित्र्यविषयविशेषसद्भावात्॥अथयथाप्रसिद्धव्याजस्फुटयोदाहरणेअप्रस्तुतात्याजनिंदास्फुटितिभ्यांप्रस्तुतस्फुटितिनिंदेगम्येतेइत्येतावतात्याजस्फुटितिमात्रमप्रस्तुतप्रशंसास्यात्॥स्फुटयास्फुटतेश्चगम्यत्वेव्याजस्फुटिरुदाहृता॥धन्योसिभृंगयस्यांतमुरबधुतिचुंबसि॥एवंचानयाप्रक्रिययायत्रामगतस्फुटिविवक्षयात्मस्यस्फुटिः क्रियतेतत्रापिव्याजस्फुटिरेवाऽप्रस्फुटिव्याजनिंदानंतरव्यस्फुटितिस्पर्धोवगमसद्भावात्।यथावा॥किंखरिणिकुनामकियच्चिरंकिमभिधानमसावकरोत्तपः। तरुणियेननवाधरपाटलंरतिविंबफलंशुकशावकः॥अत्रशुकशावकस्फुटयानायिकाधरसौभाग्यातिशयस्फुटितिर्व्यज्यते॥निंदयानिंद्यव्याजनिंदेतिगीयते॥विधेस्तनिंद्यो

छिन यस्तेप्रागेकमेवाहरच्छिरः॥अत्रहरनिंद्यविषमविधाकंसंसारंप्रवर्तयतोविधेर्निंदामिमुख्यव्याजनिंदा॥यथावा॥विधिरेवविशेषगर्हणीयःकरटंवंटकस्तवापराधःसहकारतरोश्चकारयोसोसहवासंसरलेनकोकिलेन॥अन्यस्फुटयाऽप्रस्फुटमिव्यक्तिरितिपंचमप्रकारव्याजस्फुटितिर्वंदीभूतेयंव्याजनिंदा॥ननुयत्रान्यस्फुटयान्यस्फुटिरन्यनिंदयान्यनिंदाचप्रतीयेततत्रव्याजस्फुटिव्याजनिंदालंकारयोरभ्युपगमेस्फुटितिनिंदारूपाप्रस्तुतप्रशंसोदाहरणेषुप्रस्तुतप्रशंसानवक्तव्या॥तेषामपिव्याजस्फुटिव्याजनिंदाभ्यांकोडीकरणसंभवादितिचेत्॥उच्यते॥यत्राप्रस्तुतवृत्तांतादस्फुटितिनिंदास्फुटादुतत्सदृशःप्रस्तुतवृत्तांतःप्रतीयते॥अंतश्छिद्राणिफूत्कारोसिकंटकावहोबहिरिसादोतत्रतेधावकाशासाऽन्यनिबंधनाऽप्रस्तुतप्रशंसाऽपिप्रवर्तमानाननिवारयितुंशक्याऽन्यस्फुटयान्यस्फुटिरन्यनिंदयान्यनिंदेसेवंव्याजस्फुटिव्याजनिंदेअ

पिसंभवतश्चैतत्कामंतेअपिसंभवेतांनत्वयाः परित्यागः॥यद्यपिविधिरेवविशेषगर्हणीयइतिश्लोकेविधिनिंदयातन्मूलकाकनिंदयाचाविशेषइत्यत्रभोस्तेनविद्वत्समतयास्थापितस्यमूर्खस्यचनिंदापिप्रतीयतइतिसादृश्यनिबंधनाःप्रस्तुतप्रशंसाप्यस्तितथापिसेवव्याजनिंदामूलेनिप्रथमोपस्थितासापितत्रदुर्बलेतरा॥एवंचव्याजनिंदामूलकव्याजनिंदारूपेयमप्रस्तुतप्रशंसेतिचमत्काराविशयः॥एवमेवव्याजस्फुटिमूलकेव्याजस्फुटिरूपाप्यप्रस्तुतप्रशंसादृश्यते॥यथा॥लावण्यपट्टविणव्ययोनगणितःक्लेशोमहानर्जितः स्वच्छंदंचरतोजनस्यहृदयेचिंताज्वरोनिर्मितः॥एषापिस्वगुणानुरूपरमणाभावादराकीहताकोऽर्थश्चेतसिवेधसाविनिहितस्तन्नीमिमांतन्वता अत्रात्रस्फुटायास्तरुण्याःसृष्टिनिंदाव्याजेनचतत्सौंदर्यप्रशंसाप्रशंसनीयत्वेनकविविवक्षितायाः स्वकवितायाःसृष्टिनिंदाव्याजेनतन्निंदाव्याजेनचशब्दार्थचमत्काराविशयप्रशंसायांपर्यवस्यति॥अस्यश्लोकस्यवाच्यार्थविषयेयद्यपिनायंतसामंतस्यं॥नहीमेकिल्यावीतरागस्यैतिकल्पयितुंशक्यतेरसानभिज्ञतेश्च॥वीतरागहृदयस्यएवंविधविषयेघ्रवत्वेश्च॥नाविरागिणइतियुज्यते॥तदीयविकल्पेषुधराकीतिरूपणतालिंगितस्यहतसंगलोपहितस्यवचसोऽनुचितत्वात्॥तुल्यरमणाभावादित्यस्यात्यंतमनुचितत्वाच्च॥स्वात्मनितदनुरूपतासंभावनायामविरागित्वेहिपशुत्वायतास्यानथापिविवक्षितप्रस्तुतार्थपरतायांनकिंचिदसामंजस्यं॥अतएवास्यश्लोकस्याप्रस्तुतप्रशंसापरत्वमुक्तंप्राचीनैः॥वाच्यासंभवेप्यप्रस्तुतप्रशंसोपपन्नेरिति॥आक्षेपःस्वयमुक्तस्यप्रतिषेधोविचारणात्॥चंद्रसंदर्शयात्मानमथात्तिप्रियमुखं॥अत्रप्रार्थितस्यचंद्रस्यप्रियमुखत्वेनकेमर्थ्येविचार्यअथवेत्यादिसूचितःप्रतिषेध

आक्षेपः॥ यथा वा॥ साहि सप्तार्थोनिधिमंथनोत्थकर्णीमतं रक्षतहेकवीद्राः॥ यत्तस्यदेया इवलुंठनायकार्यार्थचोराग्रगुणीप गंतिमन्द
रूंतुसर्वयदिवा यथेष्टनास्तिक्षतिः कापिकवीश्वराणा॥ रत्नेषुलुप्तेषु बहुषमर्यैरद्यापिरत्नाकरएवसिंधुः॥ अत्रप्रथमश्लोकेनाक्षिप्ते
स्यकार्यार्थचोरेभ्यारक्षणस्यस्खलितंवैचित्र्यागांसमुद्गतरत्नजालवदक्षयत्वंधिक्त्यप्रतिषेध आक्षेपः॥ निषेधाभासमक्षयंवृं॥
केचनमन्यतेनाहंदूतीतनोस्तापस्तस्याः कालानलोपमः॥ केचिदलंकारसर्वस्वकारादयस्यमाहुर्निषेधमात्रमाक्षेपः किंतुयोनिषेधस्ता
धितः सन्अर्थांतरपर्यवसितः कंचिद्विशेषमाक्षिपतिसआक्षेपः॥ यथादूत्याउक्तौनाहंदूतीतिनिषेधोबाधितत्वादाभासरूपः सन्दूत्य
लोचितकैतववचनपरिहारेणपथार्थवादित्वेपर्यवस्यन्निदानीमेवागत्यनायिकाउज्जीवनीयतिविशेषमाक्षिपति॥ यथावा॥ नरंदमं
लेनवयंराजसंदेशहारिणः॥ जगत्कुटुंबिनस्तेघनशत्रुकश्चिदिष्यते॥ अत्रसंदेशहारिणमुक्तेनवयंसंदेशहारिणइतिनिषेधो
ऽपपन्नःसंधिकालोचितकैतववचनपरिहारेणयथार्थवादित्वेवादिपर्यवस्यन्जगतीपालकस्यतवनकश्चिदपिशत्रुर्भवेनाकोकेनी
यः किंतुसर्वेपिराजानोभृत्यभावेनसंरक्षणीयाइतिविशेषमाक्षिपति॥ आक्षेपोन्योविधेयक्तेनिषेधेचतिरोहिते॥ गछगछसिचत
कांततत्रैवस्याज्जानिमम॥ अत्रगछतिविधिव्यक्तःमागाइतिनिषेधस्तिरोहितः कांतोदृश्यदेशेनिजनाम्नार्थनयास्वस्याः मरणसंसूचने
नगर्भीकृतः॥ यथावा॥ नचिरंममतापायतवयात्राभविष्यति॥ यदियास्यसियानव्यमलमाशंकयापिते॥ अत्रापिनचिरंममतापायेतिस्व
स्यामरणसंसूचनेनगम्यनिषेधोगर्भितः॥ आभासबोविरोधस्यविरोधाभासदूष्यो॥ विनापितन्निहारणवसोजोतवहारिणी॥ अत्रहारर

DR. BHAU DAJI

हितावपिहारिणोदूत्याविशिष्टेषमूलकोविरोधाभासः॥ यथावा॥ अतीयभूयेरिवकंनतोमियाविरुद्धधर्मैरपिभक्ततोहिता॥ अ
मित्रजिन्मित्रजिद्राजसासयद्विवारदक्षचारदृगथवनेत॥ अत्रविरोधसमाधानेत्रेक्षाशिरस्कोविरोधाभासइतिपूर्वस्माद्भेदः॥ वि
भावनाविनापिस्यात्कारणंकार्यजन्मचेत्॥ अपलाक्षारसासिक्तंरक्तंचक्षुरहर्यं॥ अत्रलाक्षारसायसेकारणाभावेपिरक्तिमाकथि
तः॥ स्वाभाविकत्वेनविरोधपरिहारः॥ यथावा॥ अपीतस्तीवकादंबमसंस्पृष्टामलांवरं॥ अप्रसादितसूक्ष्मांशुजगदासीन्मनोहरं॥ अत्र
पानादिप्रसिद्धहेतुभावेपिकृत्रिमत्वादिनिबंधं॥ विभाव्यमानशरत्समयहेतुकत्वेनविरोधपरिहारः॥ यथावा॥ वरतनुकबरीविधायिना
सुरभिनवेननरेंद्रपालिना॥ अपचितकुसुमापिबल्लरीसमजनिरंतमिमीनषद्पदा अत्रबल्लर्यपुष्पाभावेपिभंगालिगनंनिबद्धं॥ त
त्रवरतनुकबरीसंक्रांतसौरभनरपतिनवसंसर्गसूचेहेत्वंतरंविशेषणमुखेनदर्शितमितिविधापरिहारः॥ हतनामसमग्रेनकार्यास्तिश्च
सामता॥ अस्त्रेरतीक्ष्णकठिनैर्जगज्जयतिमन्मथः॥ अत्रजगज्जयेसाध्येहतनामस्त्राणामसमग्रत्वंतीक्ष्णत्वादिगुणवैकल्यं॥ यथावा॥
उद्यानमारुह्यतुतत्रचंपकरेणवः॥ उदस्यंतिपांथानामस्पृशंतोविलोचने॥ अत्रबाष्पोद्गमनहेतुनोरेणूनामसमग्रत्वंस्पर्शनक्रिया
वैकल्यं॥ इमावित्रोक्तिरितिदीव्याजलक्षयतेः प्रथमोदाहरणेमन्मथस्यमहिमातिशयरूपोद्वितीयोदाहरणेचंपकरेणूनांउद्दीपकत्वा
तिशयरूपश्चविरोधः स्थापितइति॥ अस्मिन्मिस्तीक्ष्णत्वादिवैकल्यमविकारणविशेषाभावरूपमितिविभावनादर्शिता॥ कार्योत्पत्तिस्तृतीयास्था

स्यापि प्रतिबंधके॥ नरेंद्रानेवतेराजन्दशास्यसिभुजंगमः॥ अत्रनरेंद्रविषवैद्याः सर्पदंशप्रतिबंधकर्मा औषधशालिनः श्लेषणगृहीता
इतिसत्येवप्रतिबंधके कार्योत्पत्तिः॥ यथावा॥ चित्रंतपतिराजेंद्रप्रतपतपवनस्तव॥अनातपत्रमुत्सृज्यसातपत्रंद्विषद्गणं॥ अकारणा
त्कार्यजन्म॥ चतुर्थीस्याद्विभावना॥शंखवाद्यांगनिनादोयमुदितिमहद्द्युतम्॥अत्रशंखवेनकामिनीकंठस्त्रीनिनादयतइतिवाध्यवसीय
इतिअकारणात्कार्यजन्म॥यथावा॥ तिलपुष्पास्तमायातिवायुश्चंदनसौरभः।इंदीवरयुगाच्चित्रंनिःसरंतिद्विजीमुखाः॥ विरुद्धात्कार्य
संपत्तिर्दृष्टाकाचिद्विभावना॥शीतांशुकिरणास्तान्विहंतसंतापयंतिमां॥अत्रतापनिवर्त्तकतयातापविरुद्धैरिंदुकिरणैस्तापजनिरुक्ता
शिताःशराश्चयुक्तः पाठः॥यथावा॥उदितेकुमारस्त्वेकुवलयमुल्लसतिभातिनक्षत्रं॥मुकुलीभवंतिचित्रंपरराजकुमारपाणिपद्मानि॥
यथावा॥अविवेकिकुचद्वंद्वंतुहिनमजगत्त्रयं॥श्रुतिप्रणयिनोरक्षणेरयुक्तंजनमारणं॥पूर्वोदाहरणयोःकार्यकारणविरोधि
त्वंस्वाभाविकमिहश्रुतिप्रणयित्वस्वरूपागंतुकगुणप्रयुक्तमितिभेदः॥ कार्यकारणजन्मापिदृष्टाकाचिद्विभावनायशःपयोधिरभ
वत्करकल्पतरोस्तव॥यथावा॥जातुताहिशैलेजातुलातायांनजायतेशैलः॥संप्रतिनद्विपधरितंकनकलतायांगिरिद्वयंजातं॥कार्यो
जनिर्विशेषोक्तिःसतिपुष्कलकारणे॥ हृदिस्नेहरसयोनाभूत्स्मरदीपेज्वलत्यपि॥यथावा॥अनुरागवतीसंध्यादिवमस्तपुरःसरः॥अ
होदैवगतिश्चित्रातथापिनसमागमः॥ असंभवोर्थनिष्पत्तेरसंभाव्यत्ववर्णनं॥कोवेदगोपशिशुकःशैलमुत्पाट्येदिति॥यथावा॥अयंगसा

मेकोनिलयइतिरत्नाकरइतिश्रुतोस्माभिस्त्वंख्यातरत्नितमनोभिर्जलनिधिः॥कएवंजानीतेनिजकरपुटीकोटरगतंक्षणेने
देनंताभ्यांनिमिमकरमायास्यतिमुनिः॥विरुद्धंभिन्नदेशत्वंकार्यहेतोरसंगतिः॥विषंजलधरैःपीतंमूर्छिताःपथिकांगनाः॥
यत्नोःकार्यहेतोर्भिन्नदेशत्वंविरुद्धंतयोस्त्रिविध्यमानमसंगत्वंकारः॥ यथाविषपानमूर्छनयोर्भिन्नदेशत्वं॥यथावा
अहोरवलुभुंजंगस्यविपरीतोविधिक्रमः॥अन्यस्यदशतिश्रोत्रमन्यःप्राणैर्वियुज्यते॥ क्वचिदसंगत्वसमाधानंनिबंधनमवाप्त
तातिशयः॥ यथा॥अजस्रमारोहसिहृदयेसंकल्पसोपानततिंदृशां॥श्वासावसर्वस्वधिकंपुनर्द्यानात्तवत्वन्मयता
मवाप्य॥विरुद्धमितिविशेषणाद्यत्रकार्यहेतोर्भिन्नदेशत्वंनविरुद्धंतत्रनासंगतिः॥ यथा॥भ्रूवापवल्लीसुमुखीयावन्नयतिव
क्त्रतां॥तावत्करोत्यविरतंविधिरेषियतेदृश्यमेमम॥अन्यत्रकरणीयस्यततोन्यत्रकृतिश्चसा॥अन्यत्रकृतंप्रत्यक्षंस्यतद्विरुद्धकृतिस्तथा
उपरिजातंवसुधांविकीर्यविद्योतथाकृथाः॥गोत्रोद्धारप्रवृत्तोपिगोत्रोद्धर्तुरधोगतेः॥अत्रकुछंप्रतिशक्रस्योपालंभवचने
ऽविविक्षितयोऽन्यत्रकरणीयमपरिज्ञातत्वंविरुद्धमिकासंगतिःपुरोगोत्रायाउद्धारप्रवृत्तेनैवराहुरूपिणाविरुद्धो
त्राणंदलनंचुरकुदनैःकृतमितिहिनीया॥ द्विविधाविश्लेषोथापिता॥यथावा॥सहस्रवक्रवंदितसपत्नविलासिनीनां
भ्रुषाभवंस्मिनगभुवनैकवीर॥नेत्रेषुकंकणमथास्रुपत्रवल्लीचोलंदृसिंहतिलकंकरपल्लवेषु॥मोहंजगत्त्रयभुवामयनस्तु
मेतदायरूपमखिलेश्वरदेहभाजां॥निःसीमकांतिरसनीरधिनमुनैवमोहंप्रवर्द्धयतिमुग्धविलासिनीनां॥अत्रायोदा

हरणे कंकणादीनामन्यत्रकरणीयत्वेप्रसिद्धिमिति नोयमलं॥ भवतिनाभावनारूपान्यत्रकृतिरास्थितइतिलक्षणानुग
तः॥ विषमंवर्ण्यतेयत्रघटनाऽनुचितरूपयोः॥ कथंचिदीषमङ्गीकृतावचरन्नरः॥ अत्रातिमृदुलेनातिदुःसहवचनानु
रूपयोरंगनासदनज्वरयोर्घटना॥ यथावा॥ अभिलषसियदीदोवक्त्रलक्ष्मीमृगाक्ष्याःपुनरपिसकरध्रोमन्त्रसंस्तालयांके॥ सुविम
लमथविंबंपरिजातप्रसूतेःसुरभयवदनोच्छ्वासकंकृतस्यामुखंवः॥ पूर्वत्रवस्तुसतीघटना॥ अत्रचंद्रवदनलक्ष्म्यासहकिंतघटने
तिभेदः॥ विरूपकार्यस्योत्पत्तिरपरंविषममतं॥ कीर्तिंप्रसूतेधवलांश्यामातवकथामिका॥ अत्रकारणगुणक्रमविरुद्धात्श्या
मादधवलोत्पत्तिः॥ कार्यकारणयोर्निर्वर्त्यनिर्वर्तकत्वेपंचमीविभावना॥ विलक्षणगुणवालिंतेतयंविषमुदितिभेदः॥ अनिष्टस्या
प्यवाप्तिश्चेतदिष्टार्थसमुद्यमात्॥ भस्मत्रयाहिमंजरीरट्टारुस्तनमर्पितः॥ इष्टार्थमुद्दिश्यकिंचित्कर्मारब्धवतस्ततोनत्व
मिष्टस्यानवाप्तिःकिंतुतत्प्रत्यवायादपिप्रतिलंभश्चेतदपिविषमं॥ यथाभस्मप्रेप्सयासर्पंयेदिकंदृष्ट्वाप्रविष्टस्यमूषकस्य
नकेवलंभस्मालाभःकिंतुस्वरूपहानिरपीति॥ यथावा॥ गोपालदहनिकंवप्रदुरश्रीरवोंछया॥ श्रितोमातस्तनश्रीरमथलभ्यंतयाकृ
तं॥ इदमर्थवाप्तिरूपेष्टार्थसमुद्यमादिष्टानवाप्तनिष्टप्रतिलंभोदाहरणं॥ अनर्थपरिहाररूपेष्टार्थसमुद्यमात्तदुभयंयथादि
विश्रितवनश्चंद्रंसंहिकेयभयाद्भुवि॥ इत्यस्यपश्यतश्चंद्रिमाश्रयस्यतातोभयं॥ अत्रनकेवलंनिःश्रेयसानर्थपरिहारानवाप्तिः किंतुस्वा
श्रयस्यापनर्थोत्पत्तिरितिनिदर्शितं॥ परानिष्टावाप्तिरूपेष्टार्थसमुद्यमाद्यथादुभयंयथा॥ दिधक्षन्माकंदीबालंतमारीप्यदहाननः॥ आत्मी

यस्यपुरस्यैवसद्योदहनमन्वभवत्॥ पुरस्यैवेत्येवकारेणपुरानिष्टप्राप्तिमात्रोदर्शितः॥ अनिष्टस्याप्यवाप्तिश्चेतिश्लोकेअनिष्टावाप्तिरपीत्यपि
शब्दसंगृहीतायाइष्टानवाप्तेश्चप्रत्येकमपिविषमपदेनान्वयः॥ ततश्चकेवलानिष्टप्रतिलंभःकेवलेष्टानवाप्तिश्चेत्यन्यदपिविषमहृद्यंलं
क्षितंभवति॥ तत्रकेवलानिष्टप्रतिलंभोयथा॥ पश्यातपत्ररसिकेसरसीरुहस्यकिंकंदमर्थयितुमिच्छसिवापिकायां॥ कालःकलि
र्जगदिदंनकृतेऽद्यमङ्क्षुस्थित्वाहरिष्यतितवैवमुखस्यलक्ष्मीं॥ अत्रपश्यातपत्रेतिपूर्वार्धबीजावापंकृतवत्यास्तल्लाभोस्यैवकिंतुमुख
शोभाहरणरूपोत्कटानिष्टप्रतिलंभः॥ केवलेष्टानवाप्तिर्यथा॥ खिन्नोसिमुंचशैलंविभोवयमितिवदन्कृशांगशिथिलभुजः॥ भरमुद्यमित
तबाहुर्गोचेत्पुरुषनरहरिर्जेष्यति॥ अत्रयद्यपिशैलस्योपरिपतनरूपानिष्टावाप्तिरपिप्रस्तुतथापिप्रगवकरांबुजसंस्पर्शमहि
म्नासानजातेतिशैलधारणरूपेष्टानवाप्तिमात्रं॥ यथावा॥ लोकेकलंकमयहातुमयंमृगांकोजातोमुखंतवपुनस्तिलकंछलेन॥ तत्रा
पिकल्पयसितच्चिकलंकरेखांनार्यःसमाश्रितजनंहिकलंकयंति॥ अत्रानर्थपरिहाररूपेष्टानवाप्तिः॥ यथावा॥ शापोप्यदृष्टतनया
ननपप्रशोभासानुग्रहोभगवतामयिपातितोयं॥ कथंदहन्नपिखलुस्तिमिंधनेद्धोबीजप्ररोहजननींदहनःकरोति॥ अत्रपरानिष्टप्रा
पणरूपेष्टानवाप्तिः स्वतोनिष्टस्यापिमुनिशापस्यमहापुरुषार्थपुत्रलाभावश्यंभावगर्भतयादशरथेजेष्ठत्वेनस्वीकृतत्वात्॥ यत्र
केनचित्स्वेष्टसिध्यर्थंप्रेषितेनान्येनानिष्टोक्तरिष्टमनपेक्षस्वस्वेष्टंसाध्यतेतत्रापिइष्टानवाप्तिरूपमेवविषमं॥ यथातंप्रतिप्रेषिताइ
तीतस्मिन्नेवलयंगता॥ मरुद्भःपश्यतमोघंमेविपाकंवाविधेरमुं॥ तस्मिन्नेवलयंगतेतिदृष्टान्तायोक्त्वाछंदर्शितं॥ यथावा॥ नपुंसकमि

निज्ञात्वाप्रियायैप्रेषितंमनः।तनुतत्रैवरमतेहताःपाणिनावयं॥एतानिसर्वध्वेवेष्टानवाप्तावुदाहरणानि॥किंचिद्दिष्टावा
प्तिपूर्वकंतदनवाप्तिर्यथामदीयेवरदराजस्तवे॥भानुर्निशासुप्तवदंघ्रिमयूखशोभालोभात्सताप्यकिरणोकरमाप्रभातं
तत्रोद्धृतेकुतघहात्क्षणलुप्तरागतापंपजत्यनुदिनंसहिमंदतापः॥यथावा॥लेढ्रकेतिमयमंबुजकोशमुद्राभंगान्ततस्तु
षमित्रकरोपकुल्या॥लब्ध्वापिपर्वणिविधुःक्रमहीयमानःशस्यत्रीरूपचितांश्रियमाशुनाशा॥अत्रद्वाद्यश्लोके
सूर्यकिरणानांरात्रिघ्नोप्रवेशनमागमसिद्धं॥सूर्यस्यनिजाकिरणेषुभगवत्प्रभारूपिमग्नेप्रभयातत्कृतेतपो
मग्नोप्रतापनंपरिकल्प्यतेषामुदयकालदृश्यमरूपिमानंचतोद्धतनाराचामिवाग्निसंतापनप्रयुक्तारूपिमा
नुरूपिंपरिकल्प्यसूर्यस्यमहतापियत्नेनताकालिकेष्टावाप्तिरेवजायतेनसार्वकालिकेष्टावाप्तिरितिदर्शितं॥हि
तीयश्लोकेचंद्रस्यभगवन्मुखलक्ष्मीमीप्समानस्यसुदूरेनमित्रशब्दश्लेषवशात्सूर्यंपरिकल्पतत्किरणस्यकमल
मुकुलविकासकस्यचंद्रानुप्रवेशंचसुदूरेणभगवन्मुखलक्ष्मीनिधानगृहकोशमुद्रामोचनपूर्वकंततोगृहीतभ
गवन्मुखलक्ष्मीकस्यतयाभवेद्भगवन्मुखलक्ष्म्याचंद्रप्रसाधनार्थंचंद्रस्यरूपंचपरिकल्पएतावतायत्नेनपौनरुक्त्या
मेवभगवन्मुखसाम्यरूपेष्टावाप्तिर्जीपतेनसार्वकालिकीतिदर्शितं॥कचिद्दिष्टानवाप्तावपितद्वाप्तिभ्रमनिबंधनंविच्छि

त्तिविनोदोयथा॥वल्लालसोणिपालत्वद्रिपुनगरेरंस्यतेकिरातीकीर्णेन्यादायरत्नान्युरुतररवदिरांगारशंकाकुलांगी॥
क्षिप्त्वाश्रीखंडखंडंतदुपरिमकुलीं॥भूतनेत्रोद्धमंतीश्वासामोदप्रसक्तैर्मधुकरपटलैर्धूमशंकांकरोति॥अत्रप्रभूताग्नि
संपादनोद्योगानसंपादनालाभेपितल्लाभभ्रमोद्धूमभ्रमोपन्यासमुखेननिबद्धः॥समंस्याद्गुणैर्नृपयद्वयोरप्यनुरूपयोः
स्वानुरूपंकृतंसदमहारेणकुचमंडलं॥प्रथमविषमविषमप्रतिद्वंद्विसमं॥यथावा॥कोमुदीवतुहिनांशुनोमंडलंजाह्नवीव
शीशखंडमंडनं॥पश्यकीर्तिरनुरूपमाश्रितावेधसाप्रतिनरसिंहमर्पिता॥यथावा॥चित्रंचित्रंवतबतमहच्चित्रमेतद्विचित्रंजा
तोदेवादुश्चिन्तघटनासंविधातावि धाता॥यन्निर्वाणंपरिणतफलस्कीर्तिरास्वादनीयायत्रैनस्याःकवलनकलाकोविदःका
कलोकः॥पूर्वसूक्तिपर्यवसायिदूषणंनिदापर्यवसायीतिभेदः॥सारूप्यमपिकार्यस्यकारणेनसमंविदुः॥नीचप्रवणतालक्ष्मि
जलजायास्तवोचिता॥इदंद्वितीयविषमप्रतिद्वंद्विसमं॥यथावा॥दवदहनादुत्पन्नोधूमोघनतामुपेत्यवर्षस्॥यछमयति
नयुक्तंसोपिहिदवमेवतिर्दहति॥यथावा॥आदोहालाहलहुतभुजादन्हस्तावलंबोबालेशंभोर्निटिलमहसावद्मेत्रोनिरु
द्धः॥प्रौढाराहारपिमुरवविपरंतरंगीरुतोयःसायंचंद्रस्तपतिकिरणैर्मामितिध्वाम्नमेतत्॥पूर्वत्रकारणस्वभावानुरूप्यं
कार्यस्य॥अत्रत्वागंतुकतदीयदुष्टसंसर्गानुरूप्यमितिभेदः॥विनानिष्टंचतत्सिद्ध्यैदर्थंकृतरूपमः॥युक्तोवारणलाभो

येस्यात्ते तेवारणार्थिनः॥ इदं समम निष्टस्याप्यवाप्तिश्चेत्यर्थसंग्रहीतस्यत्रिविधस्यापि विषमस्य प्रतिहेतूदाहृतानि॥ अनिष्टस्याप्रसंगा च॥ अत्रगजार्थितयाराजानमनुसरंतदोनारिकेर्वीर्यमाणांप्रतिनैवचनंउदाहरणं॥ नचात्रनिवारणमनिष्टमाद्यन्तमित्यनुदाहरणं-व्याशंकनीयं॥ राजहारिरक्षणंनिवारणंसंभावितमितितदंगीकृत्यत्रस्तस्यविषमालंकारोदाहरणंदिवातकिंनोक्तमनिष्टस्यभावीत॥ किंचयत्रोक्तरानिष्टसंश्लेषमहिम्नाइष्टार्थप्रतीतिस्तत्रापिसमालंकारोऽप्रतिहतएव॥ यथा॥ उच्चैर्गजेरटनमर्थयमानं एवंचामाश्रयतिहंचिरादुषितोस्मिराजन्॥ उच्चारनत्वमपिलंभयसेतदेवमामद्यनेवविफलामहतींहिसेवा॥ अत्रव्यंजकत्वाद्यद्यपि स्तुत्यानिंदामिव्योक्तिर्विवक्षायांविषमालंकारः तथापिप्राधान्यंकिंस्तुतिरूपाव्यंग्यस्यालंकारानिबंधनेएवमिष्टार्थावाप्तिसत्वेपिश्लेषवशादसतोनिष्टार्थस्यप्रतीतिस्तत्रापिसमालंकारस्यनक्षतिः॥ यथाशस्त्रेनखलुकर्तव्यमितिपित्रासमर्पितः॥ तंदवाराजकुलेनवापितुराज्ञालंघिता॥ अत्रापितुराज्ञालंघितेस्वेननिरोधालंकारामिव्यंग्यार्थेनरवल्विसूत्रपदद्वयविभागात्मकरूपांतरस्यापिविवक्षायाःसत्वेपिनखंलुनातीतिनरवल्विसैकपदेनवस्तुसदर्थांतरपररूपांतरमादायसमालंकारोऽस्यश्लेषेपिलक्ष्यसिद्धाविप्रतीतिमात्रेणापिरहितमुदाहरणंयथामसंतमःसुगसेयन्तांचक्षुरप्रतीसंसत्॥ अनुभवतिसुगतिमकलंत्वदनमनिसमस्तकमनीयं॥ विविक्तेनस्वयंतश्चेद्विपरीतफलेछया॥ नमेतिसंतस्त्रैलोक्यादपिलब्धुंसमुत्सहे॥ यथावा॥ मुखेनयितुंखलुवदनंविमलयतिजगतिदवकीनिसं॥ मित्रोल्लासंकेनुमित्रायद्युस्तिप्रतापि॥ अधिकरथुलाधारादाधेयाधिक्यवर्णनं॥

अल्पादानेनबहुयत्रतत्रमतिनेतगुणाः॥ अत्रयत्रमाहजलोघनेतानिअल्पानिबहुदायमानानिइत्याधारस्यातिविशालत्वंप्रदर्शितं त्रनमोक्षी स्याधेयानांगुणानामाधिक्यंवर्णितं॥ यथावा॥ युगांतकालप्रतिसंहृतात्मनोजगंतियस्यांबिकासमासत॥ तनोममुस्त्रनकेटभद्विषस्तमोधनाभ्यागमसंभवासुदृढ॥ इत्याधेयाद्यदाधाराधिक्यंदर्शनेविनस्मृतं॥ किंयद्वाग्ग्रहणंयत्रतेविशेष्यंनिगुणास्तवा॥ अत्रएतदतिप्रसक्तदृष्टमरोधभयेनोक्तानांगुणानांविशेष्यत्वेसंबंधावस्थानेत्याधारत्वावाग्ग्रहणंआधिक्यंवर्णितं॥ यथावा॥ अहोविशालंभुवनत्रितयादरंभातिमनुप्रशंक्योपियशोराशियदत्रते॥ अत्रयद्यपुदाहरणंदृश्यंकिंयद्वाग्ग्रहणं अहोविशालमितिवाधारयोःप्रशंसाक्रियतेतथापितनुत्वेनसिद्धत्वेनयोःशब्दस्वरूपयोर्गुणभूतयोरुपाधिकरणत्वेनो धिक्यंकाल्पयतेवप्रशंसाक्रियतइतितत्प्रशंसाप्रस्तुतेगुणयशोराशिप्रशंसायांसंभवपर्यवस्यति॥ अल्पंतुसस्मादाधेयाद्यदाधारस्य सूक्ष्मता॥ मणिमालोर्मिकातेयंकरेजघटायते॥ अत्रमणिमालामयोर्मिकातादृंगुलिमात्रपरिमितत्वात्सूक्ष्मासाधिवरहिरा याःकरेकंकणवदभेदेनोक्तातस्मिंस्तेयमालायंबुतइत्युक्तातेनोपकरस्यविरहकश्योदितिसूक्ष्मतादर्शिता॥ यथावा॥ यन्मध्यदे शादपितसूक्ष्मंलोलसिदृश्यते॥ मृणालसूत्रमपितेनैवमातिस्मनांतरे॥ अन्योन्यंनामयत्रस्याद्युपकारःपरस्परं॥ त्रिधामाशशिनो मातिशशीमातित्रिधामया॥ यथावा॥ यंथोऽसःपिबतेबुपथिकोविरलांगुलिः॥ नभाप्रपापालिकापिधारांवितनुतेतनुं॥ अत्र प्रपापालिकायाःपथिकेनस्वासक्त्यापानीयदानभाजनबहुत्वकालेस्वमुखावलोकनेऽमिलषत्स्विरलांगुलिकांजलिकर

णतश्चिरंपानीयपानानुवृत्तिसंपादनेनउपकारःकृतःतथाप्रपापालिकयापिस्वमुखावलोकनेनभिलषतःपथिकस्यधारानतूकरणतः
चिरंपानीयदानानुवृत्तिसंपादनेनउपकारःकृतः।अत्रोभयोर्व्यापारभ्यांस्वस्वोपकारसङ्गेपिपरस्परोपकारोननिवार्यते।विशे
षःख्यातमाधारंविनाप्याधेयवर्णनं॥गेतपिसूर्येदीपस्थास्तमश्छिंदंतितरुराः॥यथावा॥कमलमनेभसिकमलेचकुवलयेतानिचकु
लतिकायां॥साचसुकुमारसुभगेसुस्यातपरंपराकर्यं॥अत्राद्येसूर्यस्यप्रसिद्धाधारस्याभावेपितरुराणमन्यत्रस्थितिरुक्ता॥द्वि
तीयेसलिलस्यप्रसिद्धाधारस्याभावेपिकमलकुवलयोरन्यत्रावस्थितिरुक्ता॥क्वचित्प्रसिद्धाधाररहितानामाधाधांतरनिर्देशेविने
वापलपमवस्थितिवर्णनंदृश्यतेयथा॥दिवमधुपयातानामाकल्पमनल्पगुणगणायेषां॥रमयंतिजगंतिरिरिःकथमिवकुवयान
तेबंधाः॥अत्रकवीनामभावेपितद्गिरामाधारनिर्देशंविनैवाकल्पंअवस्थितिरुक्ता॥विशेषःसोपियद्येकंवस्तुनेकत्रवर्ण्यते॥अंतर्वेहिःपु
रःपश्चात्सर्वदिक्षपिसैवमे॥यथावा॥हृदयान्नायतोसिदिक्षुसर्वासुदृश्यसेवत्सरामगतोसीतिसंतापेनानुमीयसे॥किंचिदारंभतो
शक्यवस्तुंतरकृतिश्चसः॥लोपश्चातामयालबधंकल्पद्रुमनिरीक्षणं॥यथावा॥स्फुरदद्भुतरूपसुलतापल्लवनंत्वांसृजतानवधवि
धं॥विधिनासृजेनवोमनोपूर्णविसर्गसविताकृत्स्नतिश्च॥अत्राद्येराजदर्शनारंभणकल्परसदर्शनरूपाशक्यवस्तुंतरकृतिः॥
द्वितीयेराजसृष्टयारंभेणमनोभवादिसृष्टिरूपाशक्यवस्तुंतरकृतिः॥स्याद्याधातोन्यथाकृतिर्यथाकारिक्रियेतवेत्॥यैर्ज
गत्सृष्टयेतहंतिनैरुक्तैवेसुमायुधः॥यद्यत्साधनलेनलोकतोवगंतंतत्केनचिद्विरूढसाधनंक्रियेतवेत्सव्याघातः।यद्यत्साधनत

र्नेयैः॥ दीपकैकावली योगान्मालादीपकमिष्यते॥ स्मरेणहृदयंतस्यास्तेनत्वयिकृतास्थितिः॥ अत्रस्थितिरितिपदमेकं॥ स्मरेणतस्या
हृदयेस्थितिःकृता॥ तेनतस्याहृदयेनत्वयिस्थितिःकृतेयेवंवाक्यद्वयान्वयः॥ अतोदीपकं॥ गृहीतमुक्तरीतिसद्भावादेकावली
चेतिदीपकैकावलीयोगः॥ यथावा॥ संध्यामांगणसंगतेनभवताचंद्रेसमारोपितेदेवकर्णमयेनयेनसहसायद्यत्समासादितं॥ को
दंडेनशराःशैरेरशिरस्त्रेनापिभूमंडलंतेनतंभवताचकीर्तिरतुलाकीर्त्याचलोकत्रयं॥ अत्रयेनयेनसहसायद्यत्समासादितमिति
संक्षेपवाक्यस्थितमेकंसमासादितपदंकोदंडेनशरादित्यादिषुपदेष्वपिविपरीतेवाक्येषुतदुचितलिंगवचनविपरिणामेनान्वेतीति
दीपकं॥ शरादीनामुत्तरत्रविशेषणभावादेकावलीचेतिदीपकैकावलीयोगः॥ उत्तरोत्तरमुत्कर्षःसारइत्यभिधीयते॥ मधुरंमधुत
स्माच्चसुधातस्याःकथंवचः॥ यथावा॥ अंतर्विलोलस्त्रीलोकेनिवसतिफलोन्मिषेश्वरेसोपिशेतसिंधोःसोयंकदेशतमपिच
लुठयंकुंभयोनिश्चकार॥ धत्तेरवेर्घातलीलामयमपिनभसिश्रीनृसिंहस्तितोऽत्यंकीर्तेःकर्णोलोलस्तमिदमपिचप्रेक्षणीयं
विभाति॥ अयंश्लाघ्यगुणोत्कर्षः॥ अश्लाघ्यगुणोत्कर्षोयथा॥ तृणाल्लघुतरस्तूलस्तूलादपिचयाचकः॥ वायुनाकिंन
नीतोसौमामयंप्रार्थयतीति॥ उभयरूपोयथा॥ गिरिर्महानगिरेरधिर्महानब्धेर्नभोमहत्॥ नभसोपिमहद्धृत्ततोप्याशागरीयसी॥
तत्रब्रह्मपर्यंतेमहत्त्वंश्लाघ्यगुणःऋतार्थेतुआशायामश्लाघ्यगुणः॥ यथासंख्यक्रमेणैवकृमिकाणसमन्वयः॥ रात्रुमित्रं
विपत्तिंचजयंरंजयंभंजय॥ यथावा॥ शरणंकिंप्रपन्नानिविषवत्संत्यजंतिवा॥ नत्यज्यंतेनभुज्यंतेकृपणेनधनानियत्॥ अमुक्तमा

तानां प्राणानां कुलिशकठिनानां फलमिदं॥ अत्रदंपत्योः प्रथममभेदस्तनःप्रेयसीप्रियतमभावःततो भार्यापतिभाव इत्याधेयपर्यायः॥ परस्परार्थनिमयोन्यूनाभ्यधिकयोर्मिथः॥ जन्मोहकं शरीरमुस्काकरादान्सरिपुश्रियं॥ यथावा॥ तस्यचप्रथयसोजटापुषः स्मृणिणःकिमिवशोच्यतेधुना॥ यतनजन्नैरकलेवरव्यथाद्क्रीतमिंदुकिरणोज्ज्वलंयशः॥ परिसंख्यानिषिध्यैकस्मिन्वस्त्वंतराणास्मृहक्षयःप्रदीपवुनस्नातेषुनतक्षुवं॥ यथावा॥ विलंघयंतिक्रतिवलेमस्यालीलावतीनोनयनोत्पलानि॥ विभर्तियस्यामपिकिंभाणमेकोमहाकलजटाईवंइः॥ आद्योदहरणेनिषेधःशाब्दश्चद्वः॥ द्वितीयेतुल्यबलयोर्विकल्पालंकृतिर्मता सद्यःशिरांसिचायान्वानिमयंतुमहीभुजः॥ अत्रसमधिग्रहप्रमाणप्रमेयोःशिरश्छेदनमनयोर्युगपदुपस्थितयोर्विरोधाद्युगपत्कर्तुमशक्ययोर्विकल्पः॥ यथावा॥ पतत्यविरतंधारानिर्यंतिचकलाविनः॥ अधकोनःकृतांतोवाद्रुवस्यांतंकरिष्यति॥ प्रियसमागमश्चेत्तुनमरणमाशांसनीयं॥ मरणेतुनप्रियसमागमसंश्रयइतितयोराशांसायांविकल्पः॥ बहूनांयुगपद्भावभाजांगुणः॥ समुच्चयः॥ नश्येतिपश्चात्रश्यंतित्रस्यंतिवभवद्विषः॥ अविरोधेनसंभावितयोगपद्यानांगुणे॥ समुच्चयः॥ यथावा॥ बिभ्राणाहृदयेलयाविनिहितंप्रेमाभिधानंधनंनवंशल्यंयद्धिधुरेतिसाविधुरितासाधोतदाकर्ण्यतां॥ रोमांचुयतितास्यतिप्रलयतिप्रम्लायतिप्रेरयतिभ्राम्यत्युल्लुठतिप्रणश्यतिगलत्यूर्च्छतिदुष्यति॥ अत्रकासांचित्क्रियाणांकिंचित्कालभेदसंभवेपिनातपत्रपत्रधानभेदन्यायेनयोगपद्यं॥ विरहातिशयद्योतनायविवक्षितमितिलक्षणानुगतिः॥ अहंप्रथमि

कामाजामेककार्यान्वयेपिमः॥ कुलंरूपंवयोविद्याधनंमदयंत्यमुं॥ यत्रैकःकार्यसिद्धिहेतुत्वेनप्रक्रांतस्तत्रान्येषियथापरमार्थिकयावेलकपोतिकान्यायेनतत्सिद्धिंकुर्वंतिसोपिसमुच्चयः॥ यथामेदअभिजात्यमेकंसमर्थंकारणंनहुदेवरूपादिकमपितेसाधनत्वेनावतरति॥ यथावा॥ प्रदानंप्रच्छन्नंगृहमुपगतेसंभ्रमविधिर्निरस्तेकोलक्ष्म्यामनभिभवगंधाःपरकथाः॥ प्रियंकृत्वामौनंसदसिकथनंचाधुपकृतेःश्रुतेस्तंतासक्तिःपुरुषमभिजातंप्रकथयति॥ क्रमिकेकगतानांतुगुणःकारकदीपकं॥ गच्छत्याछतिपुनःपंथःपश्यतिपृच्छति॥ यथावा॥ निद्रातिस्मातिभुंक्तेचलतिकचभरान्रौषयंतरालेदीयंतेनचायंगाहितुमवसरोभूयआयाहियाहि॥ इत्युद्दंडैःप्रभूतामसकृदधिकृतैर्वीरितानद्वारिदीनानध्यास्यान्निकन्येसरसिरुहरुचामंतरंगैःपांगैः॥ भाद्योदाहरणेश्रुतेतस्यपांथस्यकर्तृकारकस्यगमनादिष्वन्वयः॥ द्वितीयेत्वध्याहृतस्यप्रभोःकर्तृकारकस्यैकस्यनिद्रादिषत्वयइत्येकस्यानेकवाक्यान्वयेनदीपकछायापत्तिःकारकदीपकं॥ प्रथमसमुच्चयप्रतिद्वंद्वी॥ समाधिःकार्यसौकर्यंकारणांतरसंनिधेः॥ उत्कंठितावातरुणीजगामास्तंचभानुमान्॥ यथावा॥ मानमस्यानिराकर्तुंपादयोर्मेपतिष्यतः॥ उपकारायदित्येतदुदीर्णंघनगर्जितं॥ केनचिदारक्षितस्यकार्यस्यकारणांतरसन्निधानादसौकर्यंतत्समाधानात्समाधिः॥ द्वितीयसमुच्चयप्रतिद्वंद्वीयंसमाधिः॥ तत्रहिबहूनांप्रत्येकंसमर्थानांचलेकपोतिकान्यायेनयुगपत्कार्यसाधनार्थमवतारः अत्रत्वेकेनकार्यसमारक्षितेअन्यस्यकाकतालीयन्यायेनापतितस्यतत्सौकार्यधायकत्वमात्रमत्रोदाहरणंउत्कंठितेत्यत्रैवाभिसरणपुष्कलंकारणंनत्वंधकारागममपेक्षते॥ अन्यारूढो

हिनारीणामकालक्षोमनोभवइतिन्यायात्दैवादापततांतंधकारेणतत्सौकर्यमात्रमितिएवंद्वितीयोदाहरणेपियोज्यं॥प्रत्यनीकंबलवतः
शत्रोःपक्षेपराक्रमः॥जैत्रनेत्रानुगोकर्णावुत्पलाभ्यामधःकृतौ॥यथावा॥ममरूपकीर्तिमहरद्भुवियस्तदनुप्रविष्टहृदययमित्रयि
मत्सराद्विविनिरस्तदयःसुतरांक्षिणोतिखलुतांमदनः॥एवंबलवतिप्रतिपक्षेप्रतिकर्तुमशक्नुवतदीयबाधनंप्रत्यनीकमितिस्थितेसाक्षात्स
तिपक्षेपराक्रमःप्रत्यनीकमितिकेमुतिककन्यायेनफलति॥यथा॥मधुव्रतौघःकुपितःस्वकीयमधुप्रपापप्रनिमीलनेनविघ्नंसमारूप्य
बलात्कृधांशोःकलंकमंकेध्रुवमातनोति॥किमुत्प्रेक्ष्यार्थसंसिद्धिःकाव्यार्थापत्तिरिष्यते॥सजितस्त्वन्मुखेनेदुःकावार्तासरसीरुहां॥अत्र
सइत्यनेनपद्मानियेनजितानिइतिविवक्षितं॥तथाचसोपियेनजितस्तेनपद्मानिजितानीतिकिमुवक्तव्यमितिदंडापूपिकान्यायेनपद्मज
यरूपस्यार्थस्यसंसिद्धिःकाव्यार्थापत्तिः॥तांत्रिकाभिमतार्थापत्तिव्यावर्तनायकाव्यविशेषणं॥यथावा॥अधरोयमधीराक्ष्याबंधुजीव
प्रभाहरः॥अन्यजीवप्रभांहंतरतीतिकिमद्भुतं॥स्वकीयंहृदयंमित्वामिर्गतोयोपयोधरो॥हृदयस्यान्यदीयस्यभेदनेकाकपातयोः॥
समर्थनीयस्यार्थस्यकाव्यलिंगंसमर्थनं॥जितोसिमंदकंदर्पमचिंतेस्तित्रिलोचनः॥अत्रकंदर्पजयोपन्याससोस्यदुष्करविषमतास
मर्थनसापेक्षस्यमच्चिंतेस्तित्रिलोचनइतिस्वांतःकरणेस्थितसन्निधानप्रदर्शनेनसमर्थनंकाव्यलिंगं॥व्याप्तिपक्षधर्मतादिसापेक्ष
नेयायिकोक्तलिंगव्यावर्तनायकाव्यविशेषणं॥इदंवाक्यार्थहेतुकंकाव्यलिंगं॥पदार्थहेतुकंयथा॥भस्मोद्धूलनमद्भुतंकिमभवेद्रुद्राक्ष
मालेयुनेहासोपानपरंपरागिरिसुताकांतालयालंकृते॥अथाराधनतोषितेनविभुनामुष्मात्पदीसुखालोकोछेदितिमोक्षनामनिम

क्षामोहनिधीयामहे॥अत्रमोक्षस्यमहामोहत्वमप्रसिद्धमितितत्समर्थनेसुखालोकेछेदनिरतिपदार्थोहेतुः॥क्वचित्पदार्थवाक्यार्थौ
परस्परापेक्षौहेतुत्वंभजेतां॥यथा॥विकुरुप्रकरान्जयंतितेविदुषांमूर्द्धनिसाविभर्तियान्॥पशुनाथपुरस्कृतेनतानुलनामि
छतिवामरेणकः॥अत्रवामरस्यदमयंतीकुंतलभारसाम्याभावेविदुषांमूर्द्धनियानेविभर्तीतिवाक्यार्थःपशुनाथपुरस्कृतेने
तिपदार्थश्चेत्कथंमिलितंहेतुः॥क्वचित्समर्थनीयार्थसमर्थनार्थवाक्यार्थपदार्थौहेतुः॥यथा॥वपुःप्रादुर्भावादनुमितमिदंज
न्मनिपुरापुरारेर्नक्षापिक्वचिदपिभवंतंप्रणतवान्॥नमन्मुक्तःसंप्रत्यहमतनुरत्रेयनमिमानिताक्षंतव्यंतदिदमपराधद्वयम
पि॥अत्रतावदपराधद्वयमपिसमर्थनीयमस्यस्वार्थत्वात्॥ततस्समर्थनंचपूर्वापरजन्मनोरनुमानाभ्यांवाक्यार्थभूताभ्यांक्रि
यते॥अत्रद्वितीयवाक्यार्थअतनुत्वमेकपदार्थोहेतुःआत्रापिसंप्रतिनमन्मुक्तइतिवाक्यार्थोनेकपदार्थोवाहेतुः॥क्वचित्परस्परवि
रुद्धयोःसमर्थनीययोरुभयोःक्रमाद्बोधहेतुभावंभजतः॥यथा॥असोदानत्कालोल्लासदसहभावस्यतपसःकथानोविस्रंभक्षय
चरसिकःस्रोलदुहितुः॥अत्रमोदंनोदिश्याकपटयुवेषायनयनेत्याराधित्याभ्यांयुगपदभियुक्तस्मरहरः॥अत्रशिवस्ययुगपत्प्रे
त्रिप्रसत्त्यर्थयत्नयत्नवत्तदनुवर्तनेच्छयोर्विरुद्धयोःक्रमात्गिरिजातीव्रतपसोऽसहिष्णुत्वंतत्संलापकौतुकंचेतिउभावर्थौहेतुत्वे
ननिर्दिष्टौ॥क्वचित्परस्परविरुद्धयोरुभयोःसमर्थनीययोरेकएवहेतुः॥यथा॥जीयादंनुधितनयाधररसमास्वादयन्मुरारिरयं॥

अंबुधिमथनक्लेशंकलयाब्धिफलंचसफलंच॥अत्रविफलत्वसफलत्वकल्पनयोर्विरुद्धयोरेकत्रबुधितनयाधररसाख्यादोहेतुः॥इदं
काव्यलिंगंहेत्वलंकारइतिकेचिद्वदंतिकुः॥हेगोदावरिदेवितावकतटोद्देशेकलिंगःकविर्योदेवोबहुदेशदर्शनसरंवीत्यक्त्वाविरक्तिं
गतः॥एनमर्थंवमध्यशुभमुरज्जिनाभीसरोजासनंश्लाघंगमयक्षितोकथमसावेकाकिनीस्थास्यतीत्यत्रब्रह्मणःप्रार्थनक
थंगोदावर्याकृतेत्यभिप्रायेणोत्थापितयाऽर्थापत्तेःकस्यापिवमध्यत्वादिविशेषणस्यन्यूनत्वेश्लेषाख्योगुणइति॥श्लेषोविघट
मानार्थघटकार्थस्यवर्णनमितिश्लेषलक्षणमितिचजयदेवेनोक्तं॥वस्तुतस्तुत्वत्रापिपदार्थहेतुकंकाव्यलिंगमेवततद्भेदकाभा
वात्॥ननुसामिप्रायपदार्थवाक्यार्थविन्यसनरूपात्परिकरालंकाव्यलिंगस्यकिंभेदकं॥उच्यते॥परिकरेपदार्थवाक्यार्थबलात्प्रती
यमानोर्थोनाम्नोपकारकतांभजते॥काव्यलिंगेतुपदार्थवाक्यार्थौचैवहेतुभावंभजतः॥ननुयद्यपिसुरबालाकोछेदिनीत्या
दिपदार्थहेतुककाव्यलिंगोदाहरणेऽग्रेपनेतिमानिसादिवाक्यार्थहेतुककाव्यलिंगोदाहरणेचपदार्थवाक्यार्थौबवहेतु
भावंभजनंतथापिस्फुटमत्रपदार्थहेतुकोदाहरणमुचितंनेत्रत्रितयवाक्यार्थहेतुकोदाहरणंचप्र
तीयमानार्थस्यापिहेतुकोद्यनुप्रवेशोलक्ष्यतेपश्यनेतिद्यविवेकिसाभिप्रायगर्भविदुषीत्यस्यप्रतिनिर्देशात्तत्रित्रलोचन
इतिचकंदर्पदाहकर्तृतीयलोचनसाभिप्रायगर्भकंदर्पजयोपयोगित्वान्नास्यसत्यं॥तथापिनतयोःपरिकरेण॥किंतु

तदुथापितंकाव्यलिंगमपि॥प्रतीयमानाविवेकविशिष्टेनपश्यनाप्यपुरस्कृतत्वात्स्यानेकपदार्थस्यप्रतीयमानकंद
र्पदाहृतृतीयलोचनविशिष्टस्यशिवस्यचिमन्निधानस्यवाक्यार्थस्यचवाच्यस्यैवहेतुत्ववात्॥नहितयोर्वाच्यहेतु
भावेनाभ्यांप्रतीयमानंमध्येकिंचिद्दूरमस्ति॥यथासर्वेषुचिन्निधानस्यैवादिपदार्थपरिकरोदाहरणेसर्वेषुचिन्निधा
नत्वादिनाऽन्येनपदार्थेनप्रतीयमानंशरीरस्यासंरक्षणीयत्वं॥यथाचवाक्यार्थपरिकरोदाहरणपर्यायोक्तविधया
तत्रहिवाक्यार्थेनप्रतीयमानंनाहंव्यासइत्यादिनास्मरेषुनेत्रत्रितयंचप्रतीयमानंवाच्यस्यैवपदार्थस्य
वाक्यार्थहेतुभावोपपादकतयाकालिंगस्यागमेवायथायत्तेनेत्रसमानकांतिसालिलेमग्नंतादृदीवरमित्यनेकवा
क्यार्थहेतुककाव्यलिंगोदाहरणेतत्तेनेत्रसमानकांतीत्यादिकानींदीवरराशिहंसविशेषणानितेपांवाक्यार्थोनहेतुभा
वोपपादकानीतित्रयवाक्यार्थहेतुककाव्यलिंगेपदार्थहेतुककाव्यलिंगमंगमितितयोःकाव्यलिंगोदाहरणेतुका
विदनुपपत्तिः॥उक्तेरर्थांतरन्यासःस्यात्सामान्यविशेषयोः॥हनुमानब्धिमतरद्दुष्करंकिंमहात्मनां॥गुणवद्गुरुसंस
र्गाद्याति स्वल्पोपिगौरवं॥पुष्पमालानुषंगेणसूत्रंशिरसिधार्यते॥सामान्यविशेषयोर्द्वयोरप्युक्तिरर्थांतरन्यासः॥त
योश्चैकंप्रस्तुतमन्यदप्रस्तुतंभवति॥ततश्चविशेषप्रस्तुतेतेनसहाप्रस्तुतसामान्यरूपस्यसामान्यप्रस्तुततेन

महाप्रस्तुतविशेषरूपस्यावाक्यार्थस्यन्यसनमर्थांतरन्यासइत्युक्तंभवति॥तत्राद्यस्यद्वितीयाईमुदाहरणं॥द्वितीयस्यद्वितीयःश्लो
कः॥ननुचयंकाव्यलिंगान्नातिरिच्यते।तथाहिउदाहरणद्वयेऽप्रस्तुतयोः सामान्यविशेषयोरुक्तिः प्रस्तुतयोर्विशेषसामान्ययोः
कथमुपकरोतीतिविवेक्तव्यं॥नहिसर्वथैवप्रस्तुतानन्वयप्रस्तुताभिधानंयुज्यते॥नतावत्प्रस्तुतप्रशंसायामिवप्रस्तुतयंज
कतयाप्रस्तुतयोरपिसामान्यविशेषयोःस्वशब्दोपात्तत्वात्॥नाप्यनुमानालंकारइवप्रस्तुतप्रतीतिजनकतया॥तर्हि
हेत्वाश्रितपक्षधर्मताद्यभावात्। नापिदृष्टांतालंकारइवोपमानतया॥विस्रब्धघातदोषःस्ववधायखलस्यवीरकोपकरः॥वनतरुभे
गध्वनिरिवहरिनिद्रातस्करःकरिणइत्यादिषुसामान्येविशेषस्योपमानत्वदर्शनेपिविशेषसामान्यस्यक्वचिदपितददर्शनादुप
मानत्वातदन्वयसमंजस्याप्रतीतेश्च॥तस्मात्प्रस्तुतसमर्थकतयैवाप्रस्तुतस्योपयोगइहापिवक्तव्यः॥ततश्चवाक्यार्थ
हेतुकंकाव्यलिंगमेवात्रास्यात्॥नचलंकारांतरस्यात्रावकाशइतिचेत्॥अत्रकेचित्समर्थनसापेक्षस्यार्थस्यसमर्थनेकाव्य
लिंगंनिरपेक्षस्यापिप्रतीतिवैभवात्समर्थनेर्थांतरन्यासः॥नहियत्रत्रसमानकांतिसलिलइत्यादिकाव्यलिंगोदाहर
णेक्वचिदपिसमर्थ्यसमर्थकभावोवगम्यते॥कासांनसौभाग्यगुणांगनानांनष्टःपरिभ्रष्टपयोधराणां॥
दिवाकराद्रक्षतियोगुहासुलीनंदिवाभीतमिवांधकारं॥क्षुद्रेपिनूनंशरणंप्रपन्नेममत्वमुच्चैःशिरसांसतीव इत्यादावर्थांतरन्या
सोदाहरणेष्वप्रस्तुतस्यसमर्थनासापेक्षत्वमस्तीति॥वस्तुतस्तुप्रायोवादोयंअर्थांतरन्यासेपिहिविशेषस्यसामान्येनसम

र्थनानपेक्षेपिसामान्येविशेषणसमर्थनेपेक्षतएवनिर्विशेषंनसामान्यमितिन्यायेनबहूनामध्यसाराणांसंयोगःकार्य
साधकइत्यादिसामान्यस्यतेनारभ्येतरज्जुस्तेननागोपिबध्यतइत्यादिसंप्रतिपन्नविशेषात्तत्रांविनाप्युक्तौप्रतिष्ठितत्वा
संभवात्॥नचतत्रतस्यसामान्यस्यकासांनसौभाग्यगुणांगनानामित्यादिविशेषसमर्थनार्थसामान्यस्यैवलोकसंप्रतिपन्न
विशेषावतरणेनैवयुक्तौप्रतिष्ठितत्वंसंभवतीतिश्लोकेतन्यसनेनोपन्यसनमितिवाच्यं॥सामान्यस्यसर्वत्रलोकसंप्रतिपन्नत्व
नियमाभावात्॥नहियोयोधूमवान्सोग्निमानितिव्याप्तिरूपसामान्यस्यलोकसंप्रतिपन्नतयायथामहानसादितद्विशे
षरूपदृष्टांतानुपादानसंभवमात्रेणाप्रसिद्ध्याप्तिरूपसामान्योपन्यासेनतद्विशेषरूपदृष्टांतोपन्यासनैरपेक्ष्यंसंभवति॥नचै
वंसामान्येनविशेषसमर्थनस्थलेपिकचित्तत्रयसामान्यस्यलोकत्रसिद्ध्याभावतस्वयंध्यारोहायपुनर्विशेषांतरन्यसनत्रसं
गइतिवाच्यं॥इष्टापत्तेः॥अत्रैवविषयेविकस्वरालंकारस्यानुपदमेवदर्शयिष्यमाणत्वात्॥किंचकाव्यलिंगमपिनसर्वत्रसर्वत्र
समर्थनसापेक्षत्वनियमः॥विकुरुतेकराजयंतितइत्यत्रतदभावात्॥उपमानवस्तुवर्णनीयसाम्याभावेननिंदायाःकविकृ
तेक्षुस्तंबेनात्रसमर्थनापेक्षत्वविरहात्नहितदास्यदास्येपिगतोधिकारितांनशारदःपार्वणशर्वरीश्वरइत्यादिषुसमर्थनं
दृश्यते॥नविषेणनशस्त्रेणनाग्निनानवमत्कृता॥स्त्रीप्रतीकारपारुष्यात्स्त्रीभिरयंस्त्रियःकृताइत्यादिकाव्यलिंगविषयेषुस
मर्थनापेक्षाविरहेणस्त्रीप्रतीकारपारुष्यादिनासमर्थनदर्शनाच्चनहितत्रस्त्रीणांविषादिनिर्मितत्वाभावप्रतिपादनंसम

र्थनसापेक्षंप्रसिद्ध्यतस्माद्उभयतोव्याभिचारात्समर्थनापेक्षसमर्थनेकाव्यलिंगंतन्निरपेक्षसमर्थनेऽर्थांतरन्यासइतिनविभागः॥
किंतुसमर्थ्यसमर्थकयोःसामान्यविशेषसंबंधेऽर्थांतरन्यासस्तदितरसंबंधेकाव्यलिंगमित्येवव्यवस्थानधारणीयाप्रायंचाश्चि
त्रमिमांसायांदृष्टव्यः॥एवमप्रकृतेनप्रकृतसमर्थनमुदाहृतं॥अप्रकृतेनाप्रकृतसमर्थनंयथा॥यदुच्चैतेपार्वतिपापरत्नयनरूपमियंभि
क्षितंहरः॥तथाहितेशीलमुदारदर्शनेतपस्विनामप्युपदेशतांगतं॥यथावा॥क्षनंददत्यपिजलैःसहस्राधिरूढकोविद्यमानगतिरप्ति
तुमुत्सहेत॥यद्वातिनःकटकटाहतटास्मिमंक्षोमेक्षुद्यातिपरितःपरलेरलीनां॥यस्मिन्विशेषसामान्यविशेषाःसविकरवरः॥सनजिग्ये
महांतोहिदुर्वृत्तैःसागरादृवायत्रकस्यचिद्विशेषस्यसमर्थनार्थंसामान्यंविन्यस्यतत्सिद्ध्यर्थंपुनस्तत्समर्थनायपुन
र्विशेषांतरमुपन्यस्यतिसार्थांतरन्यासविधयाभाविन्यस्येनतत्रविकस्वरालंकारः॥उत्तराईंयथाकथंचिदुदाहरणं॥इदंतुव्यत्यस्तमुदाहर
णं॥अनंतरत्नप्रभवस्यतस्यहिमंनस्तोभाग्यविलोपिजातं॥एकोहिदोषोगुणसन्निपातेनिमज्जतींदोःकिरणेष्विवांकः॥इदमुपमारी
त्योपांतरोपन्यसनेउदाहरणं॥अर्थांतरन्यसनविधयायथा॥कर्णाहंतुदमंतरेणराजीवंगाहस्वकाकस्वयमाकंदमकरंदशालिन
मिहलोमन्मोहकोलिलं॥धन्यानिस्थलवेभवेनकतिचिद्रस्तन्निकस्तूरिकोनेपालक्षितिपालभालयतितेषांकेनशंकेतरां॥यथावा॥मा
लिन्यमस्यशशिनोमधुलिट्कलंकोदंधत्तोमुखेनुतवदूतिलकात्मनाभां॥दोषावितःकथनमेलनतोगुणत्वंयत्कुंगुणोहिवसि
त्रमविप्रलंभौ॥प्रौढोक्तिरूत्कर्षहेतोस्तद्वतुल्यप्रकल्पनंरूपकः॥कलिंदजातीरतमालसोममेचकाः॥कार्यातिशयोहितत्तद्वतुल्यपरिकल्प

नंप्रौढोक्तिः॥यथाक्वसगतनेत्यादिषुमाहेनोयमुनातटेरुणेतद्वतुल्यपरिकल्पनं॥यथावा॥कल्पतरुकामदोग्ध्रीचिंतामणिअ
नदशंखानोरराचितोरजोभरपयस्तेजःरथासांतरांवैरेपः॥अत्रकल्पवृक्षादिकैकवितरणातिशायिवर्णनीयराजवितरणाहेतोक
ल्पतरुपरागादिरूपभूतपंचकनिर्मितत्वेतद्वतुल्यपरिकल्पनंप्रौढोक्तिः॥संभावनंयदीथंस्यादित्यूहोन्यस्यसिद्ध्यैयदिशेषोभवेद्ध
क्वाकथिताःस्युर्गुणास्तव॥यथावा॥कस्तूरिकामगणामंडाद्यंगुलमखिलमादायायदिपुनरहंविधिःस्यांखलजिह्वायांनिवे
शयिष्यामिअयं॥यद्यर्थोक्तिकल्पनमतिशयोक्तिभेदइतिकाव्यप्रकाशकारः॥किंचिन्मिथ्यात्वसिध्यर्थंमिथ्यार्थांतरकल्पनंमि
थ्याध्यवसितिर्वैशंयेवशयेत्तवस्तुजंवहन्॥अत्रनेत्रयावशीकरणस्यांतासंभावितत्वसिद्ध्यैगगनकुसुममालिकाधारणरूपार्थांतर
कल्पनंमिथ्याध्यवसितिः॥यथावा॥अस्यशेषणिपतेःपराङ्मुखयालक्षीकृताःसंख्यायाप्रहातुंस्फुरन्नेष्यमाणधिरश्रियाःकिलाकीर्तयः॥
गीयंतेस्वरमेयमंकलयताजातेनबंधोदरान्मूकानांप्रकरेणकूर्मरमणीदुग्धोदधेरोधसि॥अत्रायोदाहरणंनिदर्शनागर्भहेतूयंतुभ
ङ्गंअसंबंधेसंबंधरूपातिशयोक्तेर्मिथ्याध्यवसितेःकिंचिन्मिथ्यात्वसिध्यर्थंमिथ्यार्थांतरकल्पनाविच्छित्तिविशेषेणभेदः॥प्र
स्तुतेवर्ण्यवाक्यार्थप्रतिबिंबस्यवर्णनं॥ललितंनिर्गतेनीरेसेतुमेषाविकीर्यते॥प्रस्तुतेधर्मिणियोवर्णनीयावाक्यार्थस्तमवर्णयित्वा
तत्रैवतत्सरूपस्यकस्यचिदप्रस्तुतवाक्यार्थस्यवर्णनंललितं॥यथाकथंचिदाक्षिप्यसमागततत्कालोपेक्षितप्रतिनिवृत्तनायिकांतर
सकनायकानयनार्थंसखीप्रेषयितुकामानायिकमुद्दिश्यसख्यावचनेनतद्व्यापारप्रतिबंवभूतंगतजलसेतुबंधवर्णनं॥नेयमप्रस्तुत

प्रशंसा प्रस्तुतधर्मिकत्वात्॥ नापि समासोक्तिः। प्रस्तुतवृत्तांते वर्ण्यमानेश्लेषेणसाधारण्येनसारूप्येणवा अप्रस्तुतवृत्तांतस्फूर्त्या
वात्॥ अप्रस्तुतवृत्तांतदेवसरूपादिहप्रस्तुतवृत्तांतस्यगम्यत्वात्॥ नापिनिदर्शना। प्रस्तुताप्रस्तुतवृत्तांतयोः शब्दोपात्तयोरैक्य
समानोयएवतस्याः सत्त्वमेषातद्यदिविषयविषयिणोःशब्दोपात्तयोः प्रवर्त्तमानएवालंकारोविषयिमात्रोपादानेपिस्यात्तद्रूपक
कमेवक्षेदप्यभेदरूपायाअतिशयोक्तेरविषयमाक्षामेत्। ननुतद्यत्रप्रस्तुतनायकादिनिगरणेनतत्रशब्दोपात्तेप्रस्तुतेतिरो
धभेदाध्यवसायइतिभेदेअभेदरूपातिशयोक्तिरस्त्वेवंतर्हिसारूप्यनिबंधनाप्रस्तुतप्रशंसाविषयेपिसैवातिशयोक्तिः स्यात्॥अ
प्रस्तुतधर्मिकत्वान्नभवतीतिचेत्॥ तन्नाप्रस्तुतधर्मित्वंचकेषांचिदस्याविप्रसिद्धातिशयोक्युदाहरणेष्विवप्रस्तुतधर्मिलक्षकत्वसंभवात्
ननुप्रस्तुतप्रशंसायांसरूपादप्रस्तुतवाक्यार्थात्प्रस्तुतवाक्यार्थोवगम्यतेनत्वतिशयोक्तावविवक्षितत्वेकेनतत्रतद्विषयालक्ष्य
तेइतिभेदइतिचेत्तर्हीहापिप्रस्तुतगताद्प्रस्तुतवृत्तांतरूपाद्वाक्यार्थान्नूनंप्रस्तुतवृत्तांतरूपोवाक्यार्थोवगम्यइतेस्वातिशयोक्ति
तोभेदास्तु॥ वस्तुतस्तुसोपूर्वोरसनाविपर्ययविधिस्तूर्णयोश्चामलंदृष्टिःसामदविस्मृतस्तपरादिकंकिंभयसोक्तेनवा॥ पूर्वनिश्चि
तवानसिंधुरहस्यद्वारणोद्यापसावंतश्शून्यकरोनिषेद्यतइतिभ्रांतःकणभक्षमःइत्यप्रस्तुतप्रशंसोदाहरणेप्रथमपक्षेतादप्रस्तु
तवाक्यार्थात्प्रस्तुतवाक्यार्थोवगम्यतइत्येतन्नयुक्तंप्रस्तुतवारणस्यक्षमारक्षणनिराकरणैकफलमात्रस्यक्षमारक्षि
रासकारणस्यहेतुत्वंसंभवेविरसनाविपर्ययात्तःशून्यकरत्वयोर्हेतुत्वासंभवेनमदस्यप्रस्तुतत्वेचतएवहेतुत्वेनरसनाविपर्ययादिनातत्र
हेतुत्वान्नयाधैर्यवारणपदस्यदुष्प्रभुत्वविषयक्रीडाकोरणेवत्रत्वेवैफल्यात्तादवस्थ्येपियद्यप्रस्तुतसंबंधादिविशिष्टविशेषणात्त्रा ४३

DR BHAU DAJI

प्रस्तुतप्रशंसायाअतिशयोक्तेर्भेदोघटतेतदात्रापिप्रस्तुतंस्वयंनानिर्दिश्यतत्रप्रस्तुतवर्णनारूपस्यविच्छित्तिविशेषस्यसद्भा
वात्तेनभेदःस्फुटतरांघटते। पश्यनीलोत्पलदलश्यामावतीकापिस्फुरितिगगनेतत्सदृक्षेसूक्ष्मपक्ष्मलदृशिदृश्यमानेसतिवाचकेना
निर्दिष्टत्वादतिशयोक्तिरेव॥ एतेनगतजलसेतुबंधवर्णनादिषुअसंबंधेसंबंधवर्णनरूपातिशयोक्तिरस्तीतिशंकापिनिरस्ता तथासति
कस्त्वंभोःकथयामीत्यादावपितत्तत्संगात्सारूप्यनिबंधनप्रस्तुतवाक्यार्थावगतिरूपाविच्छित्तिविशेषणालंकारांतरकल्पनंनिरूपित
मित्येतत्सर्वालंकारविलक्षणमिदंललितं॥ यथावा॥ कस्तूर्यप्रभवोवंशः कलाल्पविषयामतिः॥ तितीर्षुर्दुस्तरंमोहादुडुपेनास्मिसागरं॥
अत्रापिनिदर्शनाभ्रांतिनैकार्थोदृश्यमत्सदृशंवर्णयितुमिच्छुरहमितिप्रस्तुतार्थानुपन्यासान्नतत्प्रतिबिंबाप्रस्तुतार्थवर्णनेना
दोषमालंकारविन्यासेनचकेवलंतात्पर्यस्यगम्यमानत्वात्॥ यथावा॥ अनाप्तदेशःकृतमस्त्वयाधवसंतमुक्तस्यदयोवनस्य॥
तदावसंकेतनयाकृतार्थश्चव्यापिनानेनजनेनसंज्ञा॥ अत्रकृतमोदेत्यस्वयापरित्यक्तइतिप्रस्तुतार्थमनुपन्यस्यचसंतमुक्तस्यवनस्य
दयामनायीतिनत्वतिबिंबभूतार्थमात्रोपन्यासालंकारः॥ उत्कंठितार्थसंसिद्धिर्विनायत्नंप्रहर्षणं॥ तन्मेबध्यायतेतस्मिन्सद्यो
सेवदूतिका॥ उत्कंठारहिताविशेषः॥ सर्वेंद्रियसुखास्वादोयत्रास्तीत्यभिमन्यतेतत्प्राप्तीच्छासंकल्पमुत्कंठांकवयोविदुरुत्कलक्षणा॥
तद्विषमस्यतदुपायसंपादनयत्नंविनासिद्धिः॥ प्रहर्षणंउदाहरणंस्पष्टं॥ यथावा॥ मेघैर्मेदुरमंबरंवनभुवःश्यामास्तमालद्रुमैर्नक्तंभीरुरयंत्वमेवतदिमंराधेगृहंप्रापय॥ इत्थंनंदनिदेशतश्चलितयोःप्रत्यध्वकुंजद्रुमंराधामाधवयोर्जयंतियमुनाकूलेरहःकेलयः॥ अत्रराधा

माधवयोः परस्परमुत्कंठितत्वं प्रसिद्धतरं। अत्रैवग्रंथकारेणनिबद्धमित्यत्रोदाहरणलक्षणानुगतिः॥ वांछितादधिकार्थस्य संसिद्धिः
प्रहर्षणं। दीपद्योजयेद्यावन्नावद्भुभ्युदितोरविः॥ स्पष्टं। यथावा॥ चातकस्तिर्चेतुरान्ययः कणान्याचतेजलधरंपिपासया।
सोपिपूरयतिविश्वमंभसाहंतहंतमहतामुदारता। यत्नादुपायसिध्यर्थीलक्षाल्लाभः फलस्यच॥ सिध्यंजनौषधीमूलंखनतासा
धितोनिधिः॥ फलोपायसिध्यर्थियत्नामध्येउपायसिद्धिमनपेक्ष्यसाक्षात्फलस्यैवलाभोपिप्रहर्षणं। यथानिध्यंजनसिध्यर्थंमू
लिकांखनतस्तत्रैवनिधेर्लाभः॥ यथावा॥ उच्चिनुयथममवस्थितंमृगाक्षीपुष्पोद्यंश्रितविटपंग्रहीतुकामा॥ आरोढुंपदमदधादशो
कयष्टावमूलंपुनरपितेनपुष्पितागृहत्वं॥ अत्रपुष्पग्रहणोपायत्वात्तारोहणसिध्यर्थोत्पादनिधानात्रैवपुष्पग्रहणलाभः॥ इष्य
माणविरुद्धार्थसंप्राप्तिस्तुविषादनं॥ दीपमुद्योजयेद्यावन्निर्वाणस्तावदेवसः॥ यथावारात्रिर्गमिष्यतिभविष्यतिसुप्रभातं
भास्वानुदेष्यतिहसिष्यतिपंकजश्रीः॥ इत्थंविचिंतयतिकोशगतेद्विरेफेहाहंतहंतनलिनींगज उज्जहार॥ एकस्यगुणदोषा
भ्यामुल्लासोन्यस्यतोयदि॥ अपिमांपचयेत्साध्वीस्त्रीत्वेतीच्छतिजाह्नवी॥ काठिन्यकुचयोःसृष्टोच्छ्वासःपादपद्मयोः। निर्दं
तित्वविधातारंत्यक्त्वाहाटीघरियोषितः॥ तदभाग्यंधनस्येवयन्नाश्रयतिसज्जनं॥ लाभोममैवपत्पालसेवकानांनचेदधः॥ कस्यचि
द्गुणनान्यस्यगुणःदोषणदोषोगुणेनदोषोदोषेणगुणोवायदुच्यतेसउल्लासः॥ द्वितीयार्द्धमाघस्योदाहरणं॥ तत्रपतिव्रता
महिमगुणेनतत्स्नानतोगंगायाःपावनत्वगुणोवर्णितः॥ द्वितीयश्लोकेद्वितीयोदाहरणं॥ अत्रराज्ञोधारीषुवनेषुपलायमा

नोनांअरियोषितांपदयोर्धावनपरिपंथिमार्दवदोषणतयोः काठिन्यमस्रष्टाव्यर्थंकुचयोस्तस्रष्टवतोधातुर्निघृणदोषोवर्णि
तः। तृतीयश्लोकेतृतीयचतुर्थयोरुदाहरणं। तत्रसज्जनमाहात्म्यगुणेनधनस्यतदनाश्रयणंदोषत्वेनराहः क्रौर्यदोषणतस्सेवका
नांबंधंविनानिर्गमनंगुणत्वेनवर्णितं॥ अनेनैवक्रमेणोदाहरणांतराणि॥ यथा॥ यदंधकारथसंक्षोभादंसेनांसोनिपीडितः॥ ए
कःकृतीमदंशेषुशेषमंगंसुखंभरः॥ अत्रनायिकासौंदर्यगुणेनतदंसनिपीडितस्यस्वांसस्यकृतित्वगुणोवर्णितः॥ लोका
नंदनचंदनद्रुमसरेवनास्मिन्वनेस्थीयतांदुर्वृत्तैः कठिनैरसारहृदयैराक्रांतमेतद्वनं॥ तेषुन्योन्यनिघर्षजातदहनज्वालाव
लीसंकुलानंतान्येवकुलानिकेवलमिदंसंदहेदुर्वनं॥ अत्रवेणूनांपरस्परसंघर्षसंजातदहनसंकुलत्वदोषेणवनस्यना
शरूपोदोषोवर्णितः॥ स्तनार्थिनोमधुकरायदिकर्णतालेर्हतारिक्ताःकरिवरेणमदांधबुध्या॥ तस्यैवगंडयुगमंडनहानिरेषा
भृंगाःपुनर्विकचपद्मवनेचरंति। अत्रपद्मनोरोअलंकरणत्वगुणेनगजस्यतत्क्षतिक्षेपोदोषत्वेनवर्णितः॥ आघ्रातंपरिचुंबितंप
रिमृदलीढंपुनश्चर्वितंसर्वंकृत्वाभुविनीरसेनमनसातत्रत्यजंतोमधुव्रताः॥ हसद्भिरेतैर्नवकुशलंमहानरेणादराद्दृतःसा
रविचारणव्यसनिनाचूर्णकृतंनाम्ननाअत्रवानरस्यचापलदोषपरत्वस्यचूर्णनाभावोगुणत्वेनवर्णितः॥ अत्रप्रथमचतुर्थयोरुल्ला
सोन्यार्थः। मध्यमयोश्चित्रन्यायेनलाक्षणिकः॥ तांप्रतीतोयदिनस्यातांअवहालंकृतिंकुरु॥ स्वल्पमेवांबुलभतेप्रसूप्राणिसा

सागरं॥मीलंतियदिपप्रानिकाहानिरमतघुते:॥तास्यांगुणदोषाभ्यांतौगुणदोषौ॥अत्रकस्यचितगुणेनान्यस्यगुणलाभइतीयाई
मुदाहरणं॥दोषेणदोषस्याप्राप्तौतदीयाई यथावा॥मदुक्तिश्चेदतमेदयतिसुधीभ्यसुधियः किमस्यानामस्यादलसपुरुषानादर
भरे॥यथायूनस्तदुपरमरमणीयाविरमणीकुमाराणामंतःकरणहरणंकेवकुरुते॥तंचेत्संचरमेरुषेणलघुनाकानामरिष्टंतिनं॥
व्यालेःकंकणभूषणानिकुरुषेहानिनेहस्नामपि॥मूर्ख्यंकुरुषेजडांशुमयशःकिंनामलोकत्रयीदीपस्योजगबांधवस्यजगतामी
शोसिकिंब्रूमहे॥अत्राद्येकवितारमणीगुणाभ्योअलसबालहृदयोल्लासरूपगुणाभावोवर्णितःद्वितीयेपरमेश्वरानंगीकारदो
षेणदिग्गजादीनांलघुतारूपदोषाभावोवर्णितः॥दोषस्याप्यर्थनानुज्ञातंत्रैवगुणदर्शनात्॥विपदःसंतुनशश्वत्तासःसंकीर्त्य
तेहरिः॥यथावा॥मय्येवजीर्णतांयातुयत्त्वयोपकृतंहरे॥नरःप्रत्युपकाराणांविपत्तिमभिकांक्षति॥इयंहनूमंतंप्रतिराघवस्योक्तिः॥
अत्रत्रत्रकृपकाराणांवोदोषः॥तदभ्युपगमहेतुर्गुणोविपत्याकांक्षायां॥अत्रसंक्षिप्तः॥साचव्यक्तिकैरेकमुखयुप्रेक्षेनसामान्येन
विशेषत्वमर्थनरूपेणार्थांतरन्यासेनदर्शिता॥यथावा॥भजेमभवदंतिकंप्रकृतिमेवपेशाचिकींकिमित्यमरसंपदंप्रमथनाथ
थामहे॥मवडूवनदेहलीवहलतेडुदंडाहतिःस्फुटन्मुकुटकोटिभिर्मघवदादिभिर्भूयते॥लेशःस्याद्दोषगुणयोर्गुणदोषत्वकल्पनं॥अखि
लेषुविहंगेषुहंतस्वच्छंदचारिषुशुकपंजरबंधस्तमधुराणांगिरांफलं॥दोषस्यगुणत्वकल्पनंगुणस्यदोषत्वकल्पनंचलेशः॥उदाहर
णंराज्ञोयुधिष्ठिरस्यविदुषीपुत्रेचिरंराजधान्यांप्रवसतितद्दर्शनोत्कंठितस्यपितृवचनंअत्रस्तुतप्रशंसारूपं॥तत्रप्रथमार्द्धेतरविहंगाना

मवकृत्वदोषस्यस्वच्छंदचारणानुकूलतयागुणत्वंकल्पितं॥द्वितीयार्द्धेमधुरभाषित्वगुणस्यपंजरबंधहेतुतयादोषत्वंकल्पितं॥नचात्रव्याजस्तुति
राशंकनीया॥नह्यत्रविहंगानरागांस्तुतिव्याजेननिंदायांशुकस्यनिंदाव्याजेनस्तुतौवृतात्पर्यंकिंतुपुत्रदर्शनोत्कंठितस्यदोषगुणयो
र्गुणदोषत्वाभिमानएवात्रश्लोकेनिबद्धः॥यथावा॥संतःसाक्षरितोदयव्यसनिनःप्रादुर्भवंत्यंगणाःसर्वत्रैवजनायवादचकिताजीवंति
दुःखंसदा॥अव्युत्पन्नमतिःकृतेननसतानेवासताव्याकुलोपुक्तायुक्तविवेकशून्यहृदयोधन्योजनःप्राकृतः॥इंदीवरोदाजहार॥
अथवेषगुणवानूराजायोग्यस्तेमतिरूर्जितः॥रणोत्सवेमनःसक्तंयस्यकामोत्सवादपि॥चपलोनिर्दयश्चासोजनः किंतेनमेसखि॥आ
गःप्रमार्जनायैवचाटवोयेमयाश्रिताः॥अत्राद्यश्लोकेराज्ञोवीरत्वेकस्तुतिः॥कन्यायानिरतश्चागानिर्विवेशोदपत्येनप्राप्तासतांमि
त्रमित्येषाधसख्याराजकोपपरिजिहीर्षयासएवदोषोगुणत्वेनवर्णितः॥उत्तरश्लोकेसखीभिरुपदिश्यमानंकुमारकृत्यंविज्ञासाम
र्थतोमानपरिग्रहानुगुणंप्रतिज्ञायतदनिर्वाहमाशंकमानयासखीनामुपहासंपरिजिहीर्षयानायिकयातस्यचाटुकारितागुणएव
दोषत्वेनवर्णितः॥नन्वाद्यश्लोकेस्तुतिर्निंदापर्यवसायिनीद्वितीयश्लोकेनिंदास्तुतिपर्यवसायिनीतिव्याजस्तुतिराशंकनीया॥राज
प्रकोपादिपरिहारार्थमिहनिंदास्तुत्योरन्यविदंतेज्ञातएवोद्घटनेननतोविरोधादिति॥वस्तुतस्तुहव्याजस्तुतिसङ्करेविनदोषः॥
नह्येतावतालेशमात्रस्यव्याजस्तुतेर्भावः प्रसज्यते॥तदसंकीर्णयोरपिलेशोदाहरणयोर्दर्शितत्वात्॥नापिव्याजस्तुतिमात्रस्यलेशो
र्भावः प्रसज्यतेभिन्नविषयव्याजस्तुत्युदाहरणेषुस्तुत्यवानरत्वमसंभवन्लेखार्थसंबंधकोयदुक्तंमुकुरीससेनधनिनांकूपेनचाटु
रूपेत्यादिदोषगुणीकरणस्यगुणदोषीकरणस्यचाभावात्॥तत्रान्यगुणादोषभ्यामन्यत्रगुणदोषयोः प्रतीतेः विषयकोपि॥इंदोर्लेश

त्रिपुरजयिनः कंठमलंमुरारिर्दुर्गानामरजलमषीभाजिगंडस्थलानि॥अथाप्युक्तवलयतिलकरयामलिम्लानुलिप्तान्याभासंतेवदधवलितंकियशोभिस्त्वदीयैः॥इत्याद्युदाहरणेषुलेशास्पर्शेनात्॥अत्रहिदुकूलक्षमादीनांधवलीकरणाभावदोषएवगुणत्वेननपर्यवस्यति।किंतुपरिसंख्यारूपेणतत्रान्यत्सर्वंधवलितमित्यन्योगुणःप्रतीयते॥क्वचिद्व्याजस्तुतेरुदाहरणेगुणदोषीकरणसत्वेपिस्तुतेर्विषयांतरमपिदृश्यते॥यथा॥सर्वदासर्वदोसीतिमिथ्यावंकथसेबुधैः॥नारयोलेभिरेपक्षंनवक्षःपरयोषितः॥अत्रहिबाध्यतानिदयापरिसंख्यारूपेणतत्रान्यसर्वमभिमतंअर्थिनांदीनाराद्दीयतइतिस्तुत्यंतरमपिप्रतीयते।एवंचयेषूदाहरणेषुस्तुतेरौचित्यमदोषोदुर्मिसादिगुणदोषकरणादिकमेवव्याजस्तुतिरूपतयावतिष्ठतेतत्रलेशव्याजस्तुत्योःसंकरोस्तु॥इत्थमेवहिव्याजस्तुत्यप्रस्तुतप्रशंसयोरपिप्राक्संकरोदर्शितः॥सूच्यार्थसूचनंमुद्राप्रकृतार्थपरैःपदैः॥नितंबगुर्वीतरुणीदृग्युग्मविपुलाचसा॥अत्रानायिकावर्णनपरेणयुग्मविपुलापदेनास्यानुष्टोयुग्मविपुलानामकवृत्तरूपसूच्यार्थसूचनंमुद्रा॥यद्यपत्रग्रंथेवृत्तनाम्नोनास्तिसूचनीयंतथापत्र्योत्तराईस्यलक्ष्यलक्षणयुक्तछंदःशास्त्रपातित्वेनतस्यसूचनीयत्वमस्तीतिदंतदभिप्रायेणलक्षणंयोज्यं॥एवंनवरत्नमालायांतत्तद्रत्नानांनामनिवेशनेनतत्तन्नायकजातिसूचनं।नक्षत्रमालायामन्यादिदेवतानामभिर्नक्षत्रसूचनमित्यादावपमेवालंकारः॥एवंनाटकेषुवस्त्वंशार्थसूचनमपि॥क्रमिकंप्रकृतार्थानांन्यासंरत्नावलीविदुः॥चतुरास्यःपतिर्लक्ष्म्याःसर्वंहस्त्वमहीयते॥अत्रचतुरास्यादिपदैर्वर्णनीयस्यब्रह्मविष्णुरुद्रादिनापिप्रतीयतइतिप्रसिद्धसहपाठानांप्रसिद्धक्रमाननुसरणेपमेवालंकारः॥यथायस्यवह्निमयोहृदयेषुजलमयोलोचनपुटेषुमारुतमयःश्वासेषुपृथ्वीमयोगेषुआकाशमयःशून्यतासुपंचमहाभूतमयोमूर्तिरवादृश्यतमिहितप्रतिसामंतातःपुरेषुप्रतापः॥एवमश्लोकपालनयग्रहादीनांप्रसिद्धसहपाठानांयथाकथंचित्प्रकृतोपयोगेप्रकृतादिप्रकारेणनिवेशनेपिरत्नावल्यलंकारः॥प्रकृतान्येविनाऋमिकतन्नाम्नांश्लेषभंग्यानिवेशनेपयमेवालंकारः॥तद्गुणःस्वगुणत्यागादन्यदीयगुणग्रहः॥पद्मरागायतेनासामोक्तिकंतेधरच्छिषा॥यथावा॥वीरवद्भिपुरमणीपरिधानंपल्लवानिसंस्थास्यानहरतिवनमुचिनिजकरुहरुचिरवचितानिपांडुपत्रधिया॥पुनःस्वगुणसंप्राप्तिःपूर्वरूपमुदाहृतं॥हरकंठांशुलिप्तोपित्रोपस्वधशसासितः॥यथावा॥विभिन्नवर्णागुरुद्रुमप्रजनसर्वस्वरध्याः॥परितःस्फुरत्यारतेःपुनर्यत्रहरुचारुचंस्वामानिस्मिरवंशकरीनीलैः॥अयमेवतद्गुणइतिकेचिद्व्याजदुः॥पूर्ववस्थानुकृतिश्चविकृतसतिवस्तुनि॥ईषत्सिर्वापितेपासीत्कोन्वीरतेमहन्महः॥लक्षणेचकारात्पूर्वरूपमितिलक्ष्यवाचकपदानुवृत्तिः॥यथावा॥दूरंबद्धिमिरावृतंवहिरपिप्रस्विन्नगंडैर्गजैरंतः॥कंचुकिभिर्लसन्मणिधरैरध्यासिताभूमयः॥आक्रांतंमहिषीसिरंवशयनंत्वद्विद्विषांमंदिरंराजन्सेवचिरंतनप्रणयिनीभूत्वेपिराज्यक्षितिः॥संगतान्यगुणानंगीकारमाहुरतद्गुणाविरंरागिणिमच्चित्तेनिहितापिनरज्यसि॥यथावागंगाभोगविहारतंमदेःपिछिलेदिग्गजानांवैरस्त्रीणांनयनकमलेष्वंजनानिप्रमार्ष्टियद्यपेषाहिमकरकरैर्हतसावस्त्रिकीतेकीर्तिरेषास्फुरतितदपिश्रीन्मिहासतीद्रा॥ननुवान्यगुणेनान्यत्रगुणोदयानुदयरूपाभ्यामुल्लासावज्ञालंकारभ्यांतद्गुणतद्गुणयोःकोभेदःउच्चते।उल्लासावज्ञालक्षणयोर्गुणशब्दोदोषप्रतिपक्षवाचीअन्यगुणेनअन्यत्रगुणोदयतदनुदयोवनतस्यैवगुणस्यसंक्रमणासंक्रमणे

किंतु सदृरूपदर्शनसदृसंश्लिष्टयोर्ज्ञानोत्पत्त्यनुत्पत्तिवत्तद्गुणजन्यत्वेन संभावितयोर्गुणांतरयोरुत्पत्त्यनुत्पत्तीतद्गुणयोः पुनर्गु
धा णशब्दो रूपरसगंधादिगुणवाची। तत्रान्यदीपगुणग्रहणानुग्रहणेचरकस्थरिकवस्त्रमालिन्यादिन्यायेनान्यदीपगुणेनै
वानुरंजनानुरंजनविवक्षितेतथैवचोदाहरणानिदर्शितानि। यद्यपिवहौलंकृतिरतद्गुणश्चविशेषोक्तिर्विशेषाभिधेयो
र्यजनिर्विशेषोक्तिः सतिपुकुलकारणइतितत्सामान्यलक्षणाक्रांतत्वात्तथापितद्गुणप्रतिद्वंद्विनाविशेषाको
रणालंकारांतरतयापरिगणिताधिनिध्येयं॥ प्राकृसिद्धस्वगुणोत्कर्षानुगुणः परसंनिधेः। मीलोत्सलानिदृधेतत्कदाक्षोर
तिर्मीलतीति। यथावा। कस्तूरिपिचुकापिशायनमदमनोवश्रिकेसंदृष्टः अपिचपिशाचयस्तः किंब्रूमोवेरुतंतस्य। अत्रैक
पिशाचजात्यास्वतः सिद्धस्यैवकस्तूरीमधुसेवादिभिरुत्कर्षः। मीलितंयदि सादृश्यादुद्भवनलक्ष्यतेतत्सामान्यालक्ष्मीलक्षणाया
रणेसहजोगुणः॥ मल्लिकामालभारिण्यः सर्वेगणिकाईचंदनाः। क्षौमवस्त्रानलक्ष्यंतेज्योत्स्नायामभिसारिकाः। अत्रायेचरणालंकार
सयोरुणिमगुणसाम्यात्तभेदानध्यवसायः। द्वितीयोदाहरणेचंद्रिकाभिरभिसारिकाणांधवलिमगुणसाम्याद्भेदानध्यवसा
यः। सामान्यंयदि सादृश्याद्विशेषोनोपलक्ष्यते। पद्माकरप्रविष्टानांमुखेनालक्षितुंभृंगा। रक्तस्त्रीपुंसकोक्तेप्रतिबिंबशा
तेर्हतः। लंकेश्वरः समामध्येनष्टोवालिसूनुना। मीलितालंकारएकेनपरस्यभिन्नस्वरूपानवभासरूपमीलनंक्रियतेसा
मान्यालंकारेतुभिन्नस्वरूपावभासेपिक्वचित्किंचिद्विशेषोनोपलक्ष्यतइतिभेदः। मीलितोदाहरणेहिचरणादेर्वस्त्वंतरत्वेनागंतुकंपा

वकादिनाभासतेसामान्योदाहरणेतुयत्रानोपलक्ष्यांतरतयाभानमस्त्येवातथाराचणस्यतत्प्रतिबिंबानाच। किंवि
दंपद्ममिदंमुखमथबिंबोयंप्रतिबिंबवदितिविशेषःपरैर्नोपलक्ष्यतेअतएवेदृतिरोधानेमीलितं। तदितिरोधानेपिसाम्यनव्यावर्तको
नवभासेसामान्यमित्यभ्युपगंतव्यं। केचिद्दृश्यस्यलक्षणसाम्यात्तयोर्केनचिद्दृश्यस्यस्वरूपतिरोधानेमीलि
तं। स्वरूपप्रतीतावपिगुणसाम्यात्भेदतिरोधानेसामान्यं। एवंचअपांगतरलेदृशोतरलयत्कृवर्णगिरोविलासभरमंथरागति
रतिर्विकांतंमुखंइतिस्फुरितमंगकेरागदर्शांस्तोलीलयातदत्रनभेदोयत्कृतपदापिसंलक्ष्यतइत्यत्रमीलितालंकारः। अत्रहि
दृकृतारत्यादीनांनारीवपुषःसहजधर्मत्वान्भेदोयद्यपिकार्यतथाचैतदुभयसाधारण्यात्उत्कृष्टतारत्यादियोगिनावपुषाभेद
स्यस्वरूपमेवतिरोधीयतेलिंगसाधारण्यनतद्ज्ञानोपायाभावात्। मल्लिकामाल्यहारिण्यइत्यादिषुतुसामान्यालंकारइत्याहुः।
तन्मतेपद्माकरप्रविष्टानामित्यादौभेदाध्यवसायेपिवृत्तेस्फुरणेनालंकारांतरमसाधारणसामान्यालंकारांतरभेदेनवा
पूर्वस्मिन्मतेस्वरूपतिरोधानेनालंकारांतरेणभाव्यंमीलितांतरभेदेनवाभेदवैशिष्ट्ययोः स्फूर्तावुन्मीलितविशेषोक्तौ।
हेमाद्रित्वयशोमग्नेस्कराःशीतेनजानते॥ लक्षितान्युदितेचंद्रेपद्मानिचमुखानिचेत्युन्मीलितन्यायेनभेदानध्यवसायेप्रसंकु
तोपिहितोभेदस्फूर्तौमीलितत्रुटितुन्मीलितंतथासामान्यरीत्याविशेषास्मरणेप्राप्तेकुतश्चित्कारणाद्विशेषस्फूर्तौतत्प्रतिद्वं
द्विविशेषकःक्रमेणोदाहरणद्वयं॥ तरुणरीत्यापिभेदानध्यवसायप्राप्तावुन्मीलितंदृश्यते। यथा नृत्यद्गौरहासप्रसरसह

चैरस्तायकीनैर्यशोभिर्धवल्यंनीयमानत्रिजगतिपरितःश्रीनरसिंहक्षितींद्रानेदग्यघनाभीकमलपरिमलप्रौढिमासा
दयिष्यद्वानांनाभविष्यत्कथमपिकमलाकामुकस्यानबोधः॥काकःकृष्णःपिकःकृष्णःकोभेदःपिककाकयोःवस
तेकालेसंप्राप्तेकाकःकाकःपिकःपिकः॥इदंविशेषकस्योदाहरणांतरं।अत्रद्वितीयेकाकपिकशब्दौकाकत्वेनज्ञातःपिक
त्वेनज्ञातश्चस्वार्थांतरसंक्रमितवाच्यौ॰यथावा।बाणसीवासवतीजनानासाधारणेशंकरलांछनेपि।पार्थप्रहारव्रणमु
खेगप्राचीनमीशंत्रकटीकरोति।किंचिदाकलसैहितंस्यादूढोत्तरमुत्तरं।यत्रासौवेतसीपांथतत्रेयंसुतरासरित्या।स
रित्संतरणमार्गपृच्छंतंप्रतितंकामयमानायाःस्वांप्रार्थयमानंपांथंप्रत्युत्तरमिदंवेतसीकुंजेत्वाछद्मनिव्याकृतं॥
ग्रामेस्मिन्प्रस्तरप्रायेनकिंचित्सोदकंक्षिति।पयोधरोन्नतिंदृष्ट्वावस्त्रमिच्छसिचेद्वसु।आस्तरणादिकमर्थमानंपांथं
प्रतिकाचिदियंस्तनोन्नतिंदृष्ट्वारंतुमिच्छसिचेद्वसु।अविदग्धजनप्रायेस्मिन्ग्रामेकश्चिद्रंतुमिच्छतीसेतादृशंप्रतिवं
धकंकिंचिदपिनास्तीतिदृढयंतद्भुत्तेयप्रश्नोत्तरस्योदाहरणं।निबद्धप्रश्नमुत्तरं।यथा।कुशलंतस्याजीवतिकुं
शलंदृष्टासि।जीवतीत्यकस्मात्पुनरपितेवकथयसिमतांनुकथयामियाश्वसितीतिईर्ष्यामानानंतरमनुतप्ताया
नापिकोयाःसखीमागतांप्रतिकुशलंतस्याइतिनायकस्यप्रश्नः।जीवतीतिसख्याउत्तरं।जीवत्याःकुतःकुशल
मितितदभिप्रायः।अन्यदृष्टमन्यदुत्तरमितिनायकस्यपुनःकुशलंदृष्टासीतिप्रश्नः।दृष्टस्योत्तरमुक्तमित्यभिप्रायेणाजी
वतीत्युक्तमितिसख्याक्तिः।सखीवचनोद्भटनार्थंपुनरपितेवकथयसीतिनायकस्याक्षेपः।मतांनुकथयामियाश्वसि
तीतिस्वाभिप्रायोद्भटनं।मरणेसतितस्याःकुशलंभवतीमदागमनेसमयेश्वासेषुसंवत्सरुकथंतांमृतांकथयेयमित्यभि
प्रायः।प्रश्नोत्तरोत्तराभिन्नमुत्तरंचित्रमुच्यते।केदारयोषणरताःकेखटाःकिंचलंचपः।अत्रकेदारयोषणरताइतिप्र
श्नाभिन्नमुत्तरंकेकखटाःकिंचलंइतिप्रश्नद्वयस्यैवयस्यैकमुत्तरं।उदाहरणांतराणिविदग्धमुखमंडनेद्रष्टव्यानि।सू
च्यपरशयाभिङ्गितरसाकृतचेष्टितंमयिपश्यतिसाकौशीमंतमणिमाकर्णोत्।कामुकस्यावलोकनेनसंकेतकालप्रश्नो
वेंङ्गितवाश्चेष्टयं।अस्तंगतेसूर्यसंकेतकालइत्याकूतं।यथावा।संकेतकालमनसंधिंङ्गाविदग्धया॥आसीन्नत्रापि
तासूतंलीलाप्रेमिलितं।चिह्नंपरस्तांतद्गातुःसाकूतचेष्टितं।प्रियेगृहायगतेप्रातःकांतातल्पमकल्पयत्।रात्रौ
सपत्नीगृहेजागरणेनश्रोतासीतितत्कल्पनाकृतं।यथावा।यत्कस्यैदृक्स्फुरधिंदुप्रबंधैर्दृष्टोभिन्नंकुंकुमंकापिकेठ।उ
स्त्वंतन्व्याप्रेजयंतीवयस्यास्मिलापाणेखडुलेखांलिलेख।अत्रस्फुटानुमितंपुरुषायितंपुरुषोचितरखलेखनेनप्रकाशि
तंन्यायोक्तिरन्यहेतुक्याचराकारस्यगोपनं।सखिपश्यगृहारामपरागेरस्मिन्सरा।अत्रचार्यंतकृतसंकेतंभ्रष्टलुंठ

नेनलग्नधूलिजालस्यगोपनं। कस्यवानभवेद्दोषःप्रियायाःसव्रणोधरः सभंगपद्मामाघ्रासीर्धारिनापिमयाधृतम्।
उपयतिनाखंडिताधरायानायिकायाःसकाशमागछंतंप्रियंअपश्यंसेवसख्यानायिकांप्रतिहेतोपदेशाद्वा
जेनतंप्रतिनायिकापराधगोपनं। छेकापह्नुतेरस्याश्चयंविशेषः यतस्योक्तेनस्यान्यथानयनेनापह्नवेअस्या
माकारस्यहेतंतरवर्णनेनगोपनमितिलक्षणेलक्षनाम्निचोक्तिग्रहणमाकारस्यगोपनार्थहेतंतरप्रत्यायकव्या
पारमात्रोपलक्षणं। ततश्चआधेतमालोक्यहरिंप्रतोल्यामाल्याःपुरस्तादनुरागमेकारोमांचकंपादिरूक्ष
यमानंभामाजूरहस्यप्रणमंन्यथेनमित्यत्रापिव्याजोक्तिरेव। तत्रचानुरागकृतस्यरोमांचाद्याकारस्यभक्तिरू
पहेतंतरप्रत्यायकेनप्रणामेनगोपनंकृतं। सूक्ष्मपिहितालंकारयोरपिचेष्टितग्रहणमुक्तिसाधारण्यापारमात्रोप
लक्षणं। ततश्चनलिनीदलेबलाकामरकतयात्रइवदृश्यतेमुक्तिः। इतिममसंकेतभुविज्ञात्वाभावंतदाब्रवीदाकृति
त्यादिष्वपिसूक्ष्माद्यलंकारःप्रसरति। अत्रश्लोकेतानवत्किमानयोःसंकेतस्थानंभविष्यतीतिप्रश्नाशयंस्वयमेव
कामुकेतदभिज्ञयाविदग्धयासख्यापरंकृतमुक्तेइतिसूक्ष्मालंकारोपिवर्तियतोत्रबलाकायामरकतया
त्रप्रतिलिप्तशुक्त्युपमयातस्यानिश्चलेनअध्यस्तंतेनतस्यप्रदेशस्यनिर्ज्ञत्वंतेनतदाश्रययोःसंकेतस्थानमि
तिकामुकंप्रतिसूचनंलभ्यते। नचात्रध्वनिराशंकनीयः दूरेध्वन्यमानस्यापिसंकेतस्थानप्रश्नोत्तरस्यसोत्थे

वाविच्छित्तत्वात्। एवंपिहितालंकारप्युदाहर्तव्यं। इदंचान्यदत्रावधेयं। यत्रासौवेतसीपांथस्यादिपुरःस्थान्तरसूक्ष्म
पिहितव्याजोक्त्युदाहरणेप्रभावोनसोक्त्याविच्छित्तःकिंतुवस्तूसौंदर्यबलादेवोद्भव्यविशेषविशेषितात्तगम्यत
त्रवस्तुतोनालंकारत्वंध्वनिभावास्यदत्तास्वीनेस्वोक्त्याविच्छेदेनसत्यलंकारार्हतास्तीत्यस्माभिरप्युदा
हृतानिशक्यंहियत्रासौवेतसीपांथतत्रेयंसुतरांसंभिदस्यादीनामितिपृच्छंतमध्वानंकामिसाहससूचनमित्याद्यर्थां
तरकल्पनयाभावाविष्करणमितःप्राक्लिखितेषूदाहरणेषुसंकेतकालमनसंपुंस्त्वंतन्व्याव्यंजयंतीभामाजूर
हइतिभावाविष्करणमस्तिनेवतत्तदलंकारइति। गूढोक्तिरन्योद्दश्यंचेद्यदन्यंप्रतिकथ्यते। उपायेहिपरक्षेत्रादायाति
क्षेत्ररक्षकः। यंप्रतिकिंचिदूह्यंतत्तत्स्थेमविज्ञायोक्तिरेवतदन्यंकंचित्यतिश्लेषेणाचेतेचेत्सागूढोक्तिः। एषसाधु
दाहरणं। इहपरकलत्रमुपभुंजानंकामुकंप्रतिवक्तव्यंपरक्षेत्रमस्यानिभक्षयंतमुक्षाणंकंचित्समीयुषंतंनिर्दिश्यस्थ
तोनेयमप्रस्तुतप्रशंसाकार्यकारणत्वादिव्यंग्यलाभावात्। नापिश्लेषमात्रमप्रकृतार्थप्रकृतार्थान्वयितेनविवक्षित
त्वात्ततस्यकवलमितरवंचनार्थनिर्देशतयाविच्छित्तिविशेषसद्भावात्। यथागाथोमेविपलिंगतोनगणयत्येषासपत्नी
चमांस्वक्कामामिहपुष्पिणीतिगुरवःप्राप्तागृहाभ्यंतरं। शय्यामात्रसहायिनोपरिजनःश्रांतोनमांसवतेस्वामिन्नोगमलालं
नीपरजनीलक्ष्मीपतेरक्षमां। अत्रलक्ष्मीपतिनाप्रोज्झारस्यागमनेप्रार्थ्यमानायास्तटस्थवंचनायभगवंतंप्रतिआक्षे

शस्त्रप्रत्यायनं॥ विवृतोक्तिः श्लिष्टगुप्तं कविनाविष्कृतंयदि। वदीयादिपरोक्षार्थाहितिवाक्यैस्तत्सूचनम्॥ श्लेषेणगुप्तंवस्तु यथा
कथंचित्कविनाऽऽविष्कृतंचेद्विवृतोक्तिः॥ वृषापेक्षीसदाहरणं पूर्ववद्गुप्तंचवस्तुसूचनमितिकविनाविष्कृतं॥
यथावा। दर्शमागाविषादंश्वसनमुरुजवंसंस्मनोर्ध्वप्रहर्तुंयः कोवागुरुस्तेकिमिदंखलमिदाजृंभितेनात्रयाहि। प्रत्यारब्धानंस्मु
राणामितिभयशमनछद्मनाकारयित्वा यस्मैलक्ष्मीमदाद्धः सरहतदुरितं मंथमुग्धापयोधिः। इदंपरवंचनायगुप्ताविष्करणं
तथागुप्ताविष्करणं यथा॥ दृष्ट्वाकेशवगोपरागइतयाकिंत्रस्तमयातेनहस्खलितास्मिनाथपतितंकिंनामनालंबसे॥
एकस्त्वंविषमेषुखिन्नमनसांसर्वंबलान्नोगतिर्गोप्यंगदितः सलक्ष्मवताद्रोष्टुहरेर्वश्चिरं। अत्रलक्ष्म्यापुरतोविषमेपरिस्खल
नमभिहितवत्यास्तत्कामयमानायागोपिकायाः वचनंविषमपथस्खलनपतनत्राणप्रार्थनारूपेणप्रतीयमानेनार्थेन
गुप्तंविवक्षितमर्थांतरंसलक्ष्मसूचनमित्येनाविष्कृतं॥ एवंनेषधादिषु चेतोनलकामयतेमदीयंनान्यत्रकुत्रापिचस्वामिलक्ष्म
मितिदमयंतीवाक्यादिक्रमेणोदाहरणं॥ सर्वमिदंग्रहणाक्षिक्रीडाकुतूहलप्रत्यायीविष्करणं॥ अर्थशक्तिमूलगुप्तार्थाविष्करणंयथा
गच्छाम्यच्युतदर्शनेनभवतः किंतत्रिरूपयतेकिंचैवंविजनस्यतेहतजनः संभावयत्यन्यथा। दृप्तामंत्रणभंगिसूचितरुषावक्षो
नरेवंदालसाश्लिष्यत्पुलकोरुराधिनेतनुंगोपीहरिंपृष्टवती॥ अत्रगच्छाम्यच्युतेत्याद्यामंत्रणेनस्वयंसहरतुमेनावत्कालेस्मि
तंतत्रलक्ष्यमित्यर्थशक्तिलभ्यंवस्तुतत्तीयपादेनाविष्कृतं॥ संसृष्टेकविनिबद्धवक्तृगुप्ताविष्करणोदाहरणं॥ कविगुप्ताविष्कर
णंयथा। सुभ्रुसंकुपितस्यास्यमरानंत्यल्पकथायोनिरादरविवर्जिताः सुरभयः स्वर्गाधुरोद्यः कोपरागिणिमुच्च

मध्यवनेतदृष्टप्रसीदाधुनासत्यंचद्विरहाद्भवंतिदयितेसर्वेभृशंधार्ष्टिराः। तत्रतावदीर्ष्यामानकलुषितदयितापसादनाय
पारोक्ष्यंदृष्टिप्रतीयतेदृष्टिरोगार्तस्यदृष्टिंप्रत्याक्षेपविवक्षेनार्थो। सचदृष्टेरस्यायदस्युक्तोद्धारणनसंबुद्धिरूपतामव
गमय्यविष्कृतः। कविनिबद्धवक्तृगुप्तंपरवंचनार्थंकविगुप्तंस्वप्रौढिप्रकटनार्थमितिभेदः। युक्तेः परातिसंधानक्रिय
यामर्मगुप्तये। लाभालिरंतीदृष्ट्वान्यधनुः पोषंकरालिरुत॥ अत्रेयुक्तिरचयेलखनक्रियया मन्मथोमयालिरिवनृपतिर्भो
स्त्यादेनस्वानुरागरूपमर्मोपकाशनायपरवंचनेविवक्षितः। यथावा दंपत्योर्विशिजल्पतोर्गृह्यकेनाकर्किणिनंयदृष्ट
मस्मात्तर्कसन्निधौनिहतमस्त्यातिमान्नंवधूः। कर्णालंबितपत्ररागशकलंधिन्मस्यवैदूपुरश्चीक्षणीविद्धातिदाडिमं
फलव्याजेनवाग्बंधनं। अत्रयुक्त्याक्ष्यमुद्रणयातन्मुखेनस्वकीयरहस्यनिवेदनश्रुपुंजनवंचनंकृतं। व्याजोक्तावा
कारगोपनंयुक्तौतदन्यगोपनमितिभेदः॥ यद्वा। व्याजोक्तायुक्त्यागोपनमिहयुक्त्यिययागोपनमितिभेदः। एवंचायंतमालोक्यह
रिप्रेतात्मानितिश्लोकेपियुक्तिरेव। लोकप्रवादानुकृतिर्लोकोक्तिरितिगरुडपतेः। सहस्रकृतिविन्यासान्मीलयित्वापिलोचने। अत्रलोचनमी
लयित्वेतिलोकप्रवादानुकृतिः। यथावामदृष्ट्यवरदराजस्तवे। नामंत्रतेवरदयाचितदातृभावंत्वत्तस्त्वमेवहसवरदानमुद्रां। विभ्रत्प्रसिद्ध
रविवंशकुलप्रसूत्यैयज्ञोपवीतवरुनोहिनरत्वपेक्षे। अत्रानराईलोकप्रवादानुकारः। छेकोक्तिर्यत्रलोकोक्तेः स्यादर्थांतरगर्भता। भुजंगशयनो
नीतेभुजंगशरणंसदा। केनचित्कस्यचिद्गूढंनेष्टस्यसमीपस्थमन्योन्यदृष्ट्यायमवगच्छतांतज्जानातीत्युक्तावतायमर्थः पादानाहरवजाना

तीनिलोकवादानुवादः। अत्रसत्वार्थंचलोकविहितेधनार्जनादिव्यापारसहत्वारःणाविति तद्विषयतयाकोक्त्यनुवादस्यप्रयोजनास्थिति
रहस्यंविदुगत्वापोरपितस्थायंसहवरइतिमर्मज्ञैरुदाहृतं। यथावा। मलयमरुतांद्रुताय तावत्कासितमल्लिकापरि
मलभरोभग्नोयंप्रत्यभुत्सहसेयदिघनघटयतेतंनिःस्नेहयएवनिवर्तनेप्रभवतिगवांकिन्नभवितानसएवधनंजयः। अत्रधनलि
प्सयाप्रेषितांगनासरस्विचनेयएवगवांनिवर्तनेप्रभवतिसएवधनंजयइत्योप्रजातिप्रसिद्धलोकवादानुकारः। अत्रातिसौंदर्यशा
लिनीमिमामयहंधनलिप्सयाप्रस्थितारसानभिज्ञइतिगोप्तायएव। तस्यनिवर्तनेकस्कृतस्यजेताधनेनाकृष्टस्यतद्विमुखीकरण
प्रयाकर्षकत्वादित्यर्थांतरमविवक्षितं। वक्रोक्तिःश्लेषकाकुभ्यामपरार्थकल्पनोत्तरमानंदिनंप्राप्तंनेहनंदीहरातिके। अत्र
मानंमुंचप्रभातंप्रायारात्रिरित्यभिप्रायेणोक्तायावानंदिनंप्राप्तंमामुंचेत्यर्थांतरश्लेषेणपरिकल्पितं। यथावा। अहोकेनेदृशीबु
द्धिस्तृणात्तवनिर्मिता। त्रिगुणाश्रयतेबुद्धिर्नतुदारुमयीक्वचित्। इदमविकृतश्लेषवक्रोक्तेरुदाहरणं। विकृतश्लेषवक्रोक्तिर्यथा॥
भवित्रीरंभोरुत्रिदशवदनग्लानिरधुनासतेरामस्थानयुधिपुरतोलक्ष्मणसखः। इयंयास्यत्युच्चैर्विपदमधुनादानवसमूलंछिद्यैतं
षष्ठाक्षरपरिलोपंपठपुनः। सर्वमिदंश्लेषमूलायावक्रोक्तेरुदाहरणं। अर्थश्लेषमूलायथा। भिक्षार्थंव्रजयातःसुतनुबलिम
खतांडवंक्रोधभरेणमन्येवदावनोतत्कनुसमरशिरश्छेदनेवजानेवराहं। वालेकश्चिन्नरेष्टोजरठवृषपतिर्गौरपृष्ठावतीर्णो लांगूलास्फो
टरुद्धं जलनिधिहिमवत्कन्ययोल्लायतांनः। काकायथा॥ असमालोच्यकोपस्तेनावितोयमितीरिता॥ नेवोचितोमयीतितंता

ड्यामासमलया। अत्रनेवोचितमितिकाकुस्वरविकारेणउचितएवस्वार्थांतरकल्पनोत्थापयतिक्रियास्वभावस्यजात्यादेश्चस्व
र्णनेकुरंगेक्षणतरंगाक्षस्तथकर्णेरुदीक्षितं॥यथावातोसंमुखप्रचलितोसविधेगुरूणांमार्गप्रदानरभसत्वलितावधानोत्यार्थो
पसर्पणमुभावपिभिन्नदिक्कंकृत्वामुहुर्मुहुरुपासरतांसलज्जं॥भावि कंतृतीयव्यर्थसाक्षात्कारस्यवर्णनं॥ अहंविलोकयेद्यापि
युद्धंतेनेक्षरासुराः॥स्थानभीषणवोद्भावनमिदंयथावाअद्यापितिष्ठतिदशोरिदुस्तरायंधनुर्पुनस्तनतटात्तिंप्रयत॥
यावंनिशाम्यनयनंनयनंमेतिकिंचित्तदायदकरोत्स्मितमायताक्षी॥उदात्तमृद्धिश्चरितंश्लाघ्यंजात्यादिलक्षणं॥सानोयस्याम
वधुदंतदूर्जटिकिरीटिनोः॥इदंश्लाघ्यचरितस्यान्यांगत्वेउदाहरणं॥ स्वयंउदाहरणंयथा॥रत्नसंभेदसंक्रांतप्रतिबिंबशतेरितः।
शतोलंकेश्वरःरुद्धादंजनेयेनतत्क्षतः॥अत्रक्रियाद्भुतातथशौर्यादार्यादिवर्णनं॥अर्थदातरिराजेंद्रयाचकाःकल्पशाखिनः।
इयमौदार्योक्तिः॥शौर्योक्तिर्यथा॥राजन्नसमथैकूयारास्त्वत्तातायानिशोणिताः।लेहैरिराजवनितावाष्पपूरेणपूरिताः॥
संयदुक्तावुदात्तालंकारः।शौर्योक्तावोक्त्यलंकारइतिभेदमाहुः॥अनयोरनवद्यांगिस्तनयोर्जृंभमाणयोः॥अवकाशो
नपर्याप्तस्तवगाढुलतांतरे॥अल्पंनिर्मितमाकाशमनालोच्यैववधसा॥इदमेवंविधंमाधिक्यत्वात्तन्मंदइतिसदसद्युक्तिगतत्वे
नातिशयोक्त्यलंकारभेदः॥निरुक्तियोगतोनाम्नामन्यार्थत्वप्रकल्पनं॥ईदृशेश्वरितेजीनेसंदोषाकारोभवान्॥ यथावा॥पुरा
कवीनांगणनाप्रसंगकनिष्ठिकाधिष्ठितकालिदासा॥अद्यापितत्तुल्यकवेरभावादनामिकासार्थवतीबभूव॥प्रतिषेधःप्रसिद्धस्यनि

वधस्यानुकीर्तनं॥नद्यूतमेतत्किंतवक्रीडनंनिशितैःशरैः॥निह्नुतोनिषेधःस्वेतनुपयुक्तत्वादर्थांतरंगर्भीकरोतीतिचारुतान्वितोयंप्रति
षेधोनामालंकारः॥उदाहरणंयुद्धंगेप्रस्थवस्तिष्ठमानंशकुनिंकंप्रतिविदग्धवचनंतत्रयुद्धस्याक्षद्यूतलाभावोनिह्नुतएवकीर्त्यमान
स्तत्रैवतवप्रागल्भ्येनयुद्धमुपनिग्रहोस्तीत्यपहासंगर्भीकरोति॥तच्चकिनवेषुनेनाधिक्षुतं॥यथावा॥नविषेणनशस्त्रेणनाग्नि
नानचमृत्युना॥अप्रतीकारपरुषास्त्रीभिरेवस्त्रियःकृताः॥अत्रस्त्रीणांविषादिनिमित्तलाभावःप्रसिद्धएवकीर्त्यमानस्तासां
विषाद्यतिशायिक्रौर्यमितिन्यग्भूतमर्थंव्यक्तीकरोतिसचाप्रतीकारपरुषाइतिप्रतीकारवद्भ्योविषादिभ्यस्तासांविशेषंदर्शयतावि
शेषणेनाविद्धुतः॥सिद्ध्येवंविधानंयत्तमाहुर्विधिलंकृतिं॥पंचमोदंशनेकालेकोकिलःकोकिलोभवेत्॥निह्नुतविधानमनुपयु
क्तंवाधितंसदर्थांतरगर्भीकरणेनचारुतरमितितंविधिनामालंकारमाहुः॥उदाहरणेकोकिलस्यकोकिलत्वविधानमनुपयु
क्तंसदतिमधुरंपंचमध्वनिशालितयासकलजनहृद्यत्वंगर्भीकरोतितच्चपंचमोदंशनेइतिकालविशेषणेनाविद्धुतं॥यथावा॥हेह
स्तदक्षिणमृतस्यशिशोर्द्विजस्यजीवातवेविसृजशूद्रमुनौकृपाणं॥रामस्यगात्रमसिनिर्भरगर्भखिन्नसीताप्रवासनपटोःकरुणो
कुतस्तोअत्ररामस्यस्वहस्तंप्रतिरामस्यगात्रमसीतिवचनमनुपयुक्तंसद्रामस्यस्वनेतस्यास्यतंनिह्नुतंकरुणत्वंगर्भीकरोतितच्चनि
र्भरत्वादिविशेषणेनाविद्धुतं॥यद्यप्यनयोर्विधिनिषेधयोरुदाहरणेपुष्यंत्यन्यर्थांतरसंक्रमितवाच्यरूपाणितथापिनध्वनिभा
वास्यदानिस्वोक्त्येवव्यंग्यविशेषाविद्धरणात्॥व्यंग्याविष्करणेचालंकारत्वमेवेतिप्राक्प्रकृतांकुरुप्रकरणेव्यवस्थापितत्वात्

नाधितोविधिर्ध्वनिर्निषेधोप्याक्षेपभेदत्वेनोक्तः॥इहतुप्रसिद्धोविधिरतिनिषेधोतत्प्रतिद्वंद्वनावलंकारांतरत्वेनवर्णितावितिभेदः॥हेतोर्हेतु
मतासाद्भिधानंहेतुरुच्यते॥असावुदितशीतांशुर्मानंछेदायकल्पतां॥यथावा॥एतेविद्रुमछायामरुमार्गाइवाधराः॥कस्यनोत्कंपयंत्युत्तं
साकुलितंमनः॥मानेनछेदितावाप्यकपोलश्यामालिकेयंहृद्यंस्तंभयतिसांप्रतंकिंवाधूयधेर्यंगतोतच्छत्वामनुवर्तमानफ
लमियत्प्रांजननेनानुनायःस्पष्टानपदासत्यवचोरणेस्पृष्टंनसंमन्यतइत्याद्युदाहरणंहेतुहेतुमतोरर्थंहेतुकंचित्प्रक्षेत॥लक्ष्मीविला
सविद्युत्कटाक्षावेल्लत्प्रभाः॥अत्रकार्यावश्यंभावेछेद्यादित्रसयनार्थःकार्यकारणाभेदव्यपदेशः॥यथावा॥आयुर्दानमहोत्सव
स्यविनतस्रोणीभृतांमूर्तिमान्विश्वासानयनोत्सवोमृगदृशांकीर्तेःप्रकाशोपरः॥स्यानंदःकलिताकृतिःसुमनसांवीरश्रियोजीवितंध
र्मस्पृष्टनिकेतनंविजयतेवीरःकलिंगेश्वरः॥अत्रदानमहोत्सवायुत्करसादिनाध्यवसितेनसूचितदायुद्भादिव्यपदेशः॥इत्थंशतमलंकारान्
क्षयिणानिदर्शिताः॥प्राचामाधुनिकानांचमतान्यालोच्यसर्वतः॥रसभावतदाभासभावशांतिनिबंधनाः॥चत्वारोरसवत्स्वेयुर्जेस्विच
समाहिताभावस्यचोदयःसंधिःशबलत्वमितित्रयः॥अष्टौप्रमाणालंकाराःप्रत्यक्षप्रमुखाःक्रमात्॥एवंपंचदशान्यानपलंकारान्विदु
बुधाः॥तत्रविभावानुभावव्यभिचारिभिर्व्यंजितोरतिर्हासश्चेत्यादिश्चित्तवृत्तिविशेषोरसः॥सयत्रपरस्यांगभावंयातितत्रैरसवदलंकारः॥
विभावानुभावाभ्यामभिव्यंजितोनिर्वेदादित्रयस्त्रिंशद्देवतागुरुनृपादिजकलत्रपुत्रादावभिव्यज्यमानोरतिश्चेभावः॥सयत्रपरस्यां
गंसत्रैवालंकारः॥अनोचित्येनप्रवृत्तोरसाभावश्चरसाभासाभावाभासश्चेत्युच्यतेसयत्रपरस्यांगंतदेजस्वि॥भावस्यप्रशाम्यदवस्था

भावस्यांगतिः तस्याश्च परांगत्वेसमाक्षिप्तं। भावस्याङ्गभावस्थाभावोदयः। द्वयोर्विरुद्धयोर्भावयोः परस्परस्यदुर्भिवसंधिः। बहूनांभावानां पूर्वं पूर्वोपमर्देनोत्तरभावशबलतायेतेषामपरांगत्वभावोदयादयस्त्रयोलंकाराः। तत्ररसवदुदाहरणंमुनिर्जयतियोगीद्रोमहात्माकुंभसंभवः। यिनेकचुलुकेदृष्टादिव्योतामत्यकयो। अत्रमुनिविषयरतिरूपस्यभावस्याद्भुतरसांगं। यथावा। अयंसरशनोरूर्यीनस्तनविमर्दनः। नाभ्यूरुजघनस्पर्शनीवीविस्रंसनःकरः। अत्रकरुणस्यशृंगारांगं प्रेयोलंकारएवभावालंकारउच्यते। सयथा। कदावाराणस्याममरतटिनीरोधसिवसन्कदानःकोपीनंशिरसिनिदधानोजलिपुटं। अयंगौरीनाथस्त्रिपुरहरशंभोस्त्रिनयनप्रसीदेतिक्रोशन्निमिषमिवनेष्यामिदिवसान्॥ अत्रशांतिरसस्यकदेतियदस्तिंतास्थ्योर्यभिचारिभावांगं। यथावा। असुज्ञाःपतितःस्फुरंतिगिरयःस्फारास्तथांभोधयस्तानेतानपिविभ्रतीकिमपिनश्रांतासितुभ्यनमः। आश्चर्यंमुहुर्मुहुःस्फुतिमितिप्रस्तोमित्यावेद्यस्तावद्विभर्दिमांस्मनस्तवजोयावस्तोमाऽऽहिता। अत्रत्रसुविषयरतिभावस्यवसुमतीविषयरतिभावोंगं। ऊर्जस्वियथा। त्वत्सत्यधिसुंधरशतरुणीसंत्रासतःसत्वरंयांतीवीरविलुंठितुसरभसंयाताःकिरातवने॥ तिष्ठंतिस्खलिताःप्रहृष्टपुलकास्तेविस्मितोपक्रमास्तासामुत्तरलैस्तनैरतितरांलोलैरपांगैरपि। अत्रप्रभुविषयरतिभावस्यशृंगाररसाभासोंगं॥ यथावा॥ त्वयिलोचनगोचरंगतेत्यफलंजन्मनृसिंहपूयते॥ अजनिष्टममेतिसारंयुधिविद्रापयतादृषांगणः॥ अत्रत्रैवःप्रभुविषयस्यरतिभावस्यतद्विषयद्वेषदारुणरतिरूपाभावाभासोंगं॥ समाहितंयथापाद्यामःकिमिमंप्रपद्यतइतिस्थैर्यमयलंबितंकिमनोलयतीत्यथवलुशठःकोपस्तपाणाश्रितः॥ इत्यन्योन्यविलक्षणेचतुरतस्मिन्नवस्थांतरेसद्यःजृंभितभयधृतिहरामुक्तस्या

ष्पुस्तया॥ अत्रशृंगाररसस्यकोपशांतिरंगं॥ भावोदयोयथा॥ तदद्यविश्वस्यदयालुरेधिमेदिनंनिनीषामिभवद्विलोकिनी॥ अदर्शियोद्नैविलिख्यपत्रिणानवेवरूपणसमःसमस्त्रियः॥ अत्रनलंप्रतिदमयंत्याऔत्सुक्यरूपभावस्योदयःशृंगाररसस्यांगं॥ भावसंधिर्यथा॥ एकाभूतकुसुमायुधधुधिरवप्रयत्नकुंभावलीजेतुंमंगलपालिकेवपुलकैरन्याकपोलस्थलीलोलासीक्षणमात्रभाविविरहक्लेशासहापश्यतोद्रागाकर्णयतश्चवीरभवतःप्रोदाहवाडंबरं॥ अत्ररसरतिप्रेमरणोत्सुक्यक्रव्याःसंधिःप्रभुविषयभावस्यांगं॥ भावशबलत्वंयथा। द्रोणार्यशशलक्ष्मणःकुरुकुलंभूयोपिदृश्यतसादोषाणांप्रशमायमंक्षतमहोकोपस्तिष्ठंतंमुखं॥ किंवक्ष्यत्यपकल्मषाःकृतधियःस्वप्नेपिसाकुलीभावतःस्वास्थ्यमुपहिकःखलुयुवाधन्योधरंधास्यति॥ अत्रवितर्कौत्सुक्यमतिस्मरणशंकौदन्यधृतिचिंतानांशबलताविप्रलंभशृंगारस्यांगं॥ प्रमाणालंकारप्रत्यक्षंयथा॥ क्रांतकांतनखदर्पणप्रतिबिंबभ्रमबालसहकारसुगंधा। स्वादुनिष्पतितालिनिश्चितनिर्विकारमधुनीक्रियवर्गः॥ यथावा॥ किंनावत्सरसिसरोजमेतद्दाराद्दाहस्त्रिमुखमवभासतेयुवत्याः। संशय्यक्षणमितिनिश्चिकायकश्चिद्वोकैवेकसहवासिनोपरोक्षैः॥ पूर्वंप्रत्यक्षमात्रमत्रतुविशदर्शनजन्यसंशयोत्तरप्रत्यक्षमितिभेदः। अथानुमानंयथा॥ यथारंध्रोद्गच्छज्जलदधूमःस्थगयतिस्फुलिंगानरूपंदधतिचयथाकीटमणयः। यथाविद्युज्ज्वालोल्लसितपरिपिंगाश्चकुभस्तथामन्येलग्नःपथिकतरुषंडेस्मरदवः। यथावा॥ यत्रेतालहरीचलाचलदृशोन्याःपारयंतिस्मतुंयत्रत्रैवपतंतिसंततनमीमर्मस्पृशोमार्गणाःतत्रैकीकृतचापयुक्तिवशरत्रेखलूरःकोधनोधावत्यतएवशासनधरःसत्यंतदासास्मरः। पूर्वंरूपकसंकीर्णइदमतिशयोक्तिसंकीर्णमितिभेदः। शुद्धानुमानंयथा॥ निलीयमानेविहगेगरिमोलद्विश्वंपकेजेः। विकसंत्यचमालत्यागोस्त्रस्तायतेरविः। यथावा॥ सोमित्रेननुसत्यमेतदरुतंलंकेशपुरुज्जृंभतेचंडांशोर्निशिकाकथारघुपतेचंद्रोयमुन्मीलति। वत्सेतद्दितंकथंनुभवतापंक्तुरंगंयतेः का

सिप्रेयसिहाकुरंगनयनेवंद्रानेनजानकि॥उपमानंयथा॥तोरोहिणीविजानोहिज्योतिषामत्रमंडलेयस्मिन्वितारकान्यासःशकुंताकारमार्पितः॥यथावा॥अत्रमन्मथसिंघातिसुंदरंदानवारिमिवदिव्यतेजसाशेलराजमिवधैर्येणशालिनंवेद्मिवेकरूपतिमहीपतिं॥पूर्वोदाहरणेउपमानमूलभूतमतिदेशवाक्यंदर्शितं॥अत्रोतिदेशवाक्यार्थसादृश्यप्रत्यक्षरूपमुपमानंफलेनसहदर्शितमितिविशेषः॥शब्दप्रमाणंयथा॥विकृतादोषमपिच्युतात्मनास्वयंकमीशंप्रतिसाधुभाषितंयमामनंत्यात्मभुवोपिकारणंकथंसलक्ष्यभवोभविष्यति॥अत्रशिवःपरमेष्ठिनोपिकारणमित्यत्रयोब्रह्माणंविदधातिपूर्वमितिश्रुतिरूपंशब्दप्रमाणमुपन्यस्तं॥एवंस्मृतिपुराणागमलौकिकानवाक्यरूपाण्यपिशब्दप्रमाणान्युदाहरणीयानि॥तत्रस्मृतिर्यथा॥वल्मीकुरुतयानिसंतुतान्यकृतानियः॥सर्वानयलकृतानर्थानकृतान्मनुरब्रवीत्॥पूर्वश्रुतिरभिमतार्थप्रमाणत्वेनापन्यस्तास्मृतिरनभिमतार्थतद्दूषणपरेणप्रमाणतयानीतेतिभेदः॥आप्तवाक्यमनुष्यारण्यमीमांसकोक्तधर्मप्रमाणयोर्वेदशब्दानुमायकतयाशब्दप्रमाणएवांतर्भावः॥तत्राप्तवाक्यप्रमाणंयथा॥महाजनाचारपरंपरादृष्टीस्वनामनामादृतेनृसाधवः॥अतोभिधातुंनतुत्सहेजनःकिलाचारमुचंविगायति॥आप्तसंतुष्टप्रमाणंयथा॥असंशयंक्षत्रपरिग्रहक्षमायदार्यमाधुर्यमभिलाषिमेमनः॥सतांहिसंदेहपदेषुवस्तुषुप्रमाणमंतःकरणप्रवृत्तयः॥अत्रदुष्यंतेनाप्तसंतुष्टाशकुंतलापरिग्रहस्यधर्म्यत्वंशकुंतलायाश्चक्षत्रियत्वमित्यनुमीयते॥एवंश्रुतिलिंगादिकमपिमीमांसोक्तप्रमाणंसंभवदेहोदाहर्तव्यं॥तत्रश्रुतिर्यथा॥यंहिनाभ्यवरदानधर्मस्वयंवरमुद्दिश्य॥नहिश्रुतिप्रसिद्धार्थलिंगमादियतेबुधः॥अत्रकरिगिरीश्वरस्यवरदत्वाभिधानश्रुत्यासर्वाभिलषितदातृत्वसमर्थितं॥लिंगंयथा॥विदितंवोयथास्वार्थोनमेकाश्चित्स्वकृतयः॥ननुमूर्त्तिभिरष्टाभिरित्थंभूतोसिमत्पितः॥अत्रशिवस्यश्रु
तिप्रसिद्धसर्वोपकारकपृथिव्याद्यष्टमूर्त्तिपरिग्रहलिंगेनतत्प्रवृत्तीनांलोकानुग्रहैकप्रयोजनत्वंसमर्थितं॥लिंगस्यापिमूलभूतंवेदानुमायकतयावैदिकशब्दप्रमाणएवांतर्भावः॥एवंलौकिकलिंगानामपिलौकिकशब्दोन्नायकतयालौकिकशब्दप्रमाणांतर्भावः॥अतोलोलधूलतयाविपक्षादिगुप्तन्यासविधूतंशिरस्तृतीयविद्दीक्षणेकृतमनस्कारोविलक्षस्थितःईषन्नम्रकपोलकांतिनिमुखेरण्यानतःपादयोरुत्सृष्टोगुरुसन्निधावपिविधिर्दीभ्यांनकालोचितःइत्यादिवेषारूपंप्रमाणांतरंनाशंकनीयं॥क्वचिच्छब्दप्रमाणकल्पनयाचमत्कारः॥यथा॥किमरुभिर्गलितैर्जडमन्यसमर्पयानिमज्जतुभीमकतामनतःममकिलश्रुतिमाहतदर्थिकांतलमुरवंदुपरांविबुधःस्मरः॥अत्रम्रियमाणानांमनस्यैंद्रपदिशतीत्येतदर्थिकायाःश्रुतेर्नलमुखवंद्रविषयत्वंकल्पितेतथाव्याख्यातस्मरवाक्यंप्रमाणतयोपन्यस्तं॥अर्थापत्तिर्यथा॥निर्णेतुंशक्यमसीतिमध्यतवनितंधृति॥अन्यथानोपपद्येतेपयोधरभरस्थितिः॥यथावा॥यत्कंचलीयान्यदिहोत्तुरागमादपूरयत्साजलधिनजारुचा॥गंगोद्यनिर्भर्त्सितशंभुकंधरासवर्णमर्णंकथमन्यथास्यात्॥अनुपलब्धिर्यथा॥स्फुटममदबलग्रंतन्विनिश्चिन्वंतेतदनुपलभमानास्तर्कयंतोपिलोकाः॥कुचगिरिश्चरयुग्मंयद्दिनाधारमास्तदिहमकरकेतोरिंद्रजालप्रतीमः॥संभवोयथा॥अभूतपूर्वंममभाविकिंवासर्वंसहेमसहजांहिदुःखं॥किंतुबद्धशरणागतानांपराभवोनाथनतनुरूपः॥यथावा॥यनामकंचिदिहनःप्रथयंस्यवृद्धाजानंतितेकिमपितान्प्रतिनैषयत्नः॥उत्कल्पतेतस्तिमकापिसमानधर्मालोकत्रयैकधिरविपुलाचपृथ्वी॥यथावा॥क्वातःपंथकुतोभवान्नगरतोवाग्रामतोवर्ततेगंतव्यंहियुगापदस्मयत्सत्कांप्रियांजीवि

ति ॥ सूर्यं जीवति जीवन्ती ति कथितावार्तामयापि श्रुता विस्तीर्णा पृथिवी जनोपि विधिः किंकिं सृजेत्ति न वेत्ति व्यक्तं ॥ अत्राद्योदाहरणेऽप्यू
तप्रबंधमभाविकिंवेति संभवप्रमाणसिद्धोर्थोदर्शितः । द्वितीयोदाहरणे संभवोपपादकं कालानंतर्यादिकमपिदर्शितं ॥ तृतीयोदाहरण
ेऽसंभवोपि कविवाक्यादिति भेदः । एतिद्व्यथा ॥ कल्याणीवतगाथेयंलोकि की प्रतिभाति मे ॥ एतिजीवंतिमानंदोनरंवर्षशतादपि ॥ अत्रलोकि
कीगाथेयमित्यनिर्दिष्टप्रबंधकर्तृकत्वादपारंपर्यरूपतादर्शिता ॥ अथैतेषामलंकाराणांयथासंभवंक्वचिन्मेलनेलोकिकालंकाराणांमे
लनइवचारुत्वातिशयोपलंभान्नरसिंहन्यायेनपृथगलंकारस्थितौतन्निर्णयः । क्रियते ॥ तत्रतिलतंडुलन्यायेनस्फुटावगम्यमेदालंकार
मेलनेसंसृष्टिः । नीरक्षीरन्यायेनास्फुटभेदालंकारमेलनेसंकरः । सर्वांगांगिभावेनसमप्राधान्येनसंदेहेनएकवाचकानुप्रवेशेनचतु
र्विधःएवंनरसिंहाकाराःपंचालंकाराः । तत्रसंसृष्टिर्यथा ॥ कुसुमसौरभपरिभ्रमत्षट्पदमरसंभ्रमसंभृतप्रणामया ॥ चलितयाविद
ग्धकलमेखलाकलकलोलकलोलदृशान्यया ॥ अत्रशब्दालंकारयोरनुग्राह्यग्राहकयोः संसृष्टिः । लिंपतीवतमोंगानिवर्षतीवांजनंनभः ॥ असमुरुषसेवेदृष्टिर्निष्फलतांगता ॥ श्रोत्रेक्षयोरुपमायाश्चेत्यर्थालंकाराणांसंसृष्टिः । अनंदमंथरपुरंदरमुक्तमाल्यमालो
हठनिहतंमहिषासुरस्य ॥ पादांबुजंभवतुमेविजयायमंजुमंजीरसिंजितमनोहरमंबिकायाः । अत्रशब्दार्थालंकारयोरनुग्रा
ह्यग्राहकभावसंकरोयथा ॥ तलश्चंपेतंमहीरुहाणांछायास्तदामारुतोकंपितानां ॥ शशांकसिंहेनतमोगजानांनिनरूपकं ॥ यद्यपत्रशशांकएवसिंहः तमास्यंगजानिमित्यरूपकं
सकादिसमासाश्रयणेनरूपकवत्प्रतीयमानः शशांकः सिंहइवतमांसिगजाइवेत्युपमितसमासाश्रयणेपमापिचकुशक्यातथापिहूनाकृतीनामि

ति विशेषणानुगुण्याद्रूपकसिद्धिः ॥ तस्यहिविशेषणस्यप्रधानेनसहान्वयेनभाव्यंनतुगुणेनगुणानांचपरार्थत्वादसंबंधःस
मत्यस्यादितिन्यायादुपमितसमासाश्रयेणतस्यपूर्वपदार्थप्रधानत्वात्शशांकस्यतमसांचप्राधान्यंस्यात् । तत्रचनविशेषण
मुख्यार्थान्वयसारस्यमस्तिस्वरूपनाशरूपापह्नुतिलक्षनकर्तृकर्मत्वान्वयसंभवेपिमुख्यार्थान्वयसारस्यमेवादरणीयं ॥
अतःस्वरूपनाशक्रीडीकारणत्रयत्वलक्षणामूलातिशयोक्त्यारूपकसिद्धिः ॥ तच्चरूपकंउत्प्रेक्षायाअंगं ॥ नतुस्थापकत्वात्रूप
कमपिवेहिछायाःहूनगात्रखंडाइवोपपत्तेस्तावदुक्तोपमेवसिध्यत् ॥ वपनादिसाधर्म्यात् । नछायानांसंघःकृत्तगात्रखंडतादात्म्यसं
भावनारूपोत्प्रेक्षा ॥ ननुशशांकेनहूनाकृतीनांतमसांगात्रखंडाइवोपपत्तेस्तावदुक्तोपमापिसिध्यत्कुत्रेक्षा ॥ तदात्म्यसंभावनापमूहूना
कृतिरूपाधिकविशेषणोपादानात् ॥ सत्यं । तथोक्तावाकृतिलवनादिधर्मरूपकार्यसमारोपनिमित्तंशशांकतमसोर्हतृहंतव्यचेतनव
र्तितसमारोपरूपासमासोक्तिरपक्षणीयाएवमुक्तोरूपकमितिविशेषः । एवमात्रातिशयोक्तिरूपकोत्प्रेक्षाणामंगांगिभावेनसंकरः ॥ ११८ ॥
समप्राधान्यसंकरोयथा ॥ अवतुनःसवितुरुक्तरागावलीसमर्पितलंघिततुंगपयोधरा । स्फुरितमध्यगताहूनायकामरकतैकलतेवनभः
श्रियः ॥ अत्रपयोधरादिशब्दश्लेषमूलातिशयोक्त्यागर्भतयास्थाप्यमानयोसवितृरागावल्यांगगनश्रीमरकतैकवल्लीतादा
त्म्यप्रत्यक्षानुभवलक्ष्यानायिकाव्यवहारसमारोपरूपसमासोक्तिर्गर्भीथाप्यते ॥ पयोधरश्लेषस्याभयोपकारकत्वात्ततश्चउत्प्रेक्षा
समासोक्त्योरंकः कालः परस्परापेक्षमाश्रित्यसमुन्मेषश्चोभयोस्तुल्यइतिविनिगमनाविरहात्समप्राधान्यं ॥ यथावा ॥ अंगुलीभिरि

वकेशसंचयसंनिरुद्धतिमिरमरीचिनिः।कुड्मलीकृतसरोजलोचनंचुवनीवरजनीमुखंशशी।।अत्रांगुलीभिरितिवाक्योक्तोयम
यांगभूतयोरुपमानेवशशिकरैकनिशामुखचुंबनोत्प्रेक्षानिशाशशिनोर्दंपतिव्यवहारसमारोपरूपसमासोक्तिरंगमेवो
त्थापयते।उपमयोरुभयत्रोत्थापकत्वाविरोधात्।समासोक्तिगर्भतांविनाचुंबनोत्प्रेक्षायानिरालंबनत्वाच्च।।ततश्चात्राणुत्प्रेक्षासं
मासोक्त्योरेककालयोःसमप्राधान्यं।।यद्यपत्रोपमाभ्यांशशिनिशागतावेरधर्मोसमर्थनेननुशशिनायकयोर्निशानायिकयोःसमा
धारणधर्मसमर्पणंवचुत्प्रेक्षासमासोक्त्योरपेक्षितं।उत्प्रेक्षायाःप्रकृताप्रकृतसाधारणगुणक्रियारूपनिमित्तसापेक्षत्वात्समासोक्तेर्विशे
षणसाम्यमूलकत्वाच्च तथापिपाक्योक्तोपमायामिवकारस्यमरीचिभिरित्येवनयांतरमभ्युपगम्यानेयभेदलब्धस्यप्रकृताप्रकृतयोरे
केकविषयस्यार्थद्वयस्यसमासोक्तोपमायांसरोजसदृशंलोचनमितिसमासांतरमभ्युपगम्यसमासभेदलब्धार्थद्वयस्यचाभेदाध्यवसाय
नैसाधारण्यंसंपाद्यतयोरुत्प्रेक्षासमासोक्त्यंगतानिर्वाह्या।।यद्वा।इहप्रकृतकोटिगतानांमरीचितिमिरसरोजानांअप्रकृतकोटिगतानां
अंगुलीकेशसंचयलोचनानांचतनुदीर्घीकरणत्वनीलनीरंध्रत्वकांतिमत्वादिनासदृशानांप्रातिस्विकरूपेणभेदवदनुगतसादृश्यप्रयो
जकरूपेणाभेदोप्यस्ति।।सकात्रविवक्षितएवभेदाभेदोभयप्रधानोपमेयालंकारिकसिद्धांतात्।।तत्रचप्रयोजकांशनिष्कर्षन्यायेनाभेदगं
भीतांशोयशोजीवनेननसाधारण्यंसंपाद्यप्रधानभूतोत्प्रेक्षासमासोक्त्यंगतानिर्वाह्या।।नहित्विकाशशीतापनयनशक्तिमतःसोरतेज

सःशीतापनयनशक्तिमात्रेणशीतालूपयोगितानरक्षा।।एवमनभ्युपगमेचपांड्योपमसार्पितलंवहारःकृष्णांगरागोहरिचंदनेन।।आभाति वा
लातपरक्तसानुःसनिर्झरोद्गारइवाद्विराजइत्याद्युपमापिननिर्वहेत्।नह्यत्राद्विराजपांड्ययोरुपमानोपमेययोरनुगतःसाधारणधर्मोनिर्दि
ष्टः।एकत्रबालातपनिर्झरौअन्यत्रहरिचंदनरागइतिधर्मभेदात्।।तस्मान्नत्रातपहरिचंदनयोर्निर्झरहरयोश्चसदृशयोरभेदांशापेक्षीवनमव
गतिः।।पिनष्टीवतरंगाग्रैःसमुद्रःफेनचंदनं।।तदादायकरैरिंदुर्लिंपतीवदिगंगनाः।अत्रोत्प्रेक्षयोःकालभेदेपिसमप्राधान्यं।।अन्योन्यनिर
पेक्षयोक्त्योपात्तत्वानदादायेतिफेनचंदनरूपकमात्रोपजीवनेनपूर्वोत्प्रेक्षानपेक्षणात्।।ननुलिंपतीवतमोंगानिवृतित्वदुत्प्रेक्षाद्यस्य
संसृष्टिरेवयमितिवाच्यं।।कथंकसिद्धयेषणलेपनयोर्नपर्यछायानुकारिकारिणोत्प्रेक्षाद्वयस्यवापर्यणद्वारुताप्रतिशयसमुन्मेषतः
संसृष्टेरेवम्योनस्माद्दृशादिवदेकफलसाधननयासमप्रधानमिदमुत्प्रेक्षाद्वयं।।एवंसमप्रधानसंकरोपिव्याख्यातः।।संदेहसंकरोयथा।।
शशिनमुपगतेयंकौमुदीमेघमुक्तंजलनिधिमनुरूपंजह्नुकन्यावतीर्णा।।इतिसमगुणयोगप्रीतयस्तत्रयोराःश्रवणकटुनृपाणामेकवाक्यंवि
धुः।।इयमितिसर्वनाम्नाअंतरंतनवतीदुमतीयदिविशिष्टरूपेणनिर्दिश्यतेतदाबिंबप्रतिबिंबभावापन्नधर्मविशिष्टयोःसदृशयोरेक्यारोप
रूपानिदर्शना।।यदितेनसास्वरूपेणनिर्दिश्यतेबिंबभूतोधर्मस्तूपरिप्रस्तावात्समगुणयोगप्रीतयइतिपौरविशेषणाच्चगम्यतेतदाप्रस्तुतधर्मणि
तद्वंतंप्रतिबिंबभूताप्रस्तुतरत्नातारूपरूंलितमित्यनध्यवसायात्संदेहः।।विलीयेदुःसाक्षादमृतरसधापीयदिभवत्कलंकस्तत्रसोयादिव
विकचेंदीवरवनं।ततःस्नानक्रीडाजनितजलमाधेरयपवेःकदाचिन्मुंचेयमदनशिखिपीडापरिभवं।।अत्रयद्यतावत्साधनंसंपद्यततदातापः

शाम्यतीत्येतावत्यर्थेकविसंरंभश्चेन्नदोषान्तसिद्ध्यर्थमुक्तमिति संभावनालंकारः। एतावत्साधनेकदापिनसंभवद्येयातस्तापशांतिरपिगगन
कुसुमकल्पेत्यर्थेकविसंरंभश्चेत्तर्हिमिथ्यात्वसिध्यर्थंमिथ्यावार्थांतरकल्पनारूपामिथ्याध्यवसितिरित्युभय
दृत्संभवात्संदेहः एवंसिक्तस्फटिककुंभांतःस्थितस्वेतिकतैर्नरैः मोक्तिकंवेक्षितंतत्तुष्यैस्तेसमंघटइत्यादि
ष्वपिसंभावनामिथ्याध्यवसितिसंदेहसंकरोद्रष्टव्यः॥सुखेनगमलंभुवनमुलेवसतिश्चेत्फणिपतिफलसंदोहगु
रुणातरुणाकिंप्रयोजनं॥अत्रमहोरगवृत्तांतवर्ण्यमानेराजद्वारूढखलवृत्तांतोपिप्रतीयते॥तत्रकिंवस्तुतस्तथाभूतोरगवृत्तांतएवप्रस्तु
तोऽप्रस्तुतःखलवृत्तांतस्ततःप्रतीयतइतिसमासोक्तिः॥अथवाप्रस्तुतःखलवृत्तांतस्तत्प्रत्यायनायाप्रस्तुतमहोरगवृत्तांतकीर्त्तन
मित्यप्रस्तुतप्रशंसा।यद्वा।वर्ण्यमानमहोरगवृत्तांतकीर्त्तनेनसमीपस्थितखलमर्मोद्घाटनंक्रियतइत्यप्रस्तुतवाप्रस्तु
तांकुरइतिसंदेहः॥एकवाचकानुप्रवेशसंकरस्तुशब्दार्थालंकारयोरेवंलक्षयित्वाकाव्यप्रकाशकारउदाजहार॥स्पष्टोछसत्किर
णकेसरसूर्यबिंबविस्तीर्णकर्णिकमयोदिवसारविंदं॥श्लिष्टाष्टदिग्दलकलापमुखावतारबद्धांधकारमधुपावलिसंचुकोच॥अ
त्रैकपदानुप्रविष्टोरूपकानुप्राणो॥यत्रैकस्मिन्श्लोकपदभेदेनशब्दार्थालंकारयोःस्थितिस्तत्रतयोःसंसृष्टिःइहतुसंकरइति॥अ
लंकारसर्वस्वकारस्तुएकस्मिन्वाचकेऽनुप्रवेशोवाच्ययोरेवालंकारयोःस्वारसिकः।वाच्यप्रतियोगिकत्वाद्वाचकत्वस्यैतिमत्यार्थालं
कारयोरप्येकवाचकानुप्रवेशसंकरमुदाजहार॥सत्युत्करघोतितरंगशोभिन्यमंदमारब्धमृदंगवाद्ये।उद्यानवापीपयसीवयस्यामे

णीदृशोनाद्यगृहंरमंते॥अत्रनाद्यगृहवापीपयसोःसत्युत्करेत्यादिविशेषणशब्दसाम्यश्लेषः॥अमंदमारब्धेत्यादिविशेषणेअ
र्थेसाम्यमुपमातदुभयमेकस्मिन्निवशब्देअनुप्रविष्टमितितदपिनमन्यामहे॥सत्युत्करेत्यादिविशेषणविश्लेषभिन्निकाभेदाध्य
वसायरूपातिशयोक्तिलभ्यस्यधर्मसाम्यस्येवतत्रवशब्दप्रतिपाद्यतयाशब्दसाम्यस्यतदप्रतिपाद्यत्वात्॥श्लेषभिन्निकाभेदाध्य
वसायेनधर्मसाम्यलाभानंगीकारे॥अहोरागवतीसंध्याजहातिस्वयमंबरं॥इत्यादिश्लिष्टविशेषणसमासोक्त्युदाहरणेविशेषण
साम्याभावेनसमासोक्तभावप्रसंगात्॥शब्दसाम्यस्यवशब्दप्रतिपाद्येपितस्यायमाबाचकत्वस्यैवप्राप्त्याश्लेषवाचकत्वा
लाभाच्च॥शब्दतोर्थतोवाकविसंमतसाम्यप्रतिपादनंसर्वविधेषूपमालंकारस्वीकारात्॥अन्यथा॥यथाप्रह्लादनाच्चंद्रःप्रतापात्त
पनोयथा॥तथैवसोभदन्नर्थोराजाप्रकृतिरंजनात्इत्रापूपमानस्यात्॥नह्यत्रान्यर्थनामरूपशब्दसाम्यंविनाकिंचिदर्थ
साम्यंकविर्विवक्षितुमर्हति॥तस्माद्यत्रैकस्मिन्नर्थेप्रतिपाद्यमानेलंकारद्वयलक्षणयोगादलंकारद्वयप्रतीतिःतत्रतयोरलंका
रयोरेकवाचकानुप्रवेशः॥यथा॥विधुकरपरिरंभादत्तनिषंदपूर्णैःशशिरुषपदुयक्तैरालवालैस्तरूणां॥विफलितजलसेक
प्रक्रियागौरवेणव्यरचिसदृतचित्तस्तत्रभवानिवेन॥अत्रोहिप्रतिपाद्यमानोर्थःसमृद्धिमद्रूक्षवर्णनमुदानमितिलक्षणानु
सारादुदात्तालंकाररूपःअसंबंधेसंबंधकथनमतिशयोक्तिरितिलक्षणादतिशयोक्तिरूपश्च।नचसर्वत्रोदात्तस्यासंबंधेसंब

धवचनरूपत्वंनिर्णीतमितिनविविक्तालंकारद्वयलक्षणसमावेशोक्तीतिवाक्यैक्यं॥दिव्यलोकगतसंपत्समृद्धिवर्णनादिद्यतिशयोक्त्यस्पृष्टस्योदात्तस्यशौर्यादार्यादिविषयातिशयवर्णनेऽप्युदात्तास्पृष्टायाअतिशयोक्तेश्चपरस्परविविक्ततयाविश्रांतेः॥तयाश्चेहार्थवशसंपन्नसमावेशयोर्नांगांगिभावः॥एकेनापरस्यानुत्थापनात्स्वातंत्र्यपारतंत्र्यविशेषादर्शनाच्च॥नापिसमप्राधान्यंयेःशब्दैःरिहसमृद्धिमद्वस्तुप्रतिपाद्यतेतैरेवतस्यैववस्तुनोऽसंबंधसंबंधरूपस्यप्रतिपाद्यमानतयाभिन्नप्रतिपादकशब्दव्यवस्थितार्थभेदाभावात्॥नापिसंदेहसंकरः॥एकालंकारकोटिघातदन्यालंकारकोटिप्रतिक्षेपाभावात्॥तस्मादिहोदात्तातिशयोक्त्योरेकवाचकानुप्रवेशलक्षणःसंकरः॥क्वचित्संकराणामपिसंकरोदृश्यते॥यथा॥मुक्ताःकलिविसूत्रहारगलिताःसंमार्जनीसृष्टताःप्रातःप्रांगणसीम्निमंथरचलद्बालांघ्रिलाक्षारुणाःदूराद्दाडिमबीजशंकिततथियःकपोतिकेलीशुकायद्दृढंवेपथुमाजन्पतेस्त्यागलीलायितं॥अत्रतावद्दृढुर्यसंपत्समृद्धिवर्णनमुदात्तालंकारः॥तन्मूलकोबालांघ्रिलाक्षारुणाइत्यत्रतद्गुणालंकारः॥तत्रैववक्ष्यमाणभ्रांत्युपपादकःपदार्थहेतुककाव्यलिंगालंकारश्चेतितयोरेकवाचकानुप्रवेशसंकरःतन्मूलकःशंकितधियइत्यत्रभ्रांतिमदलंकारः॥ताभ्यांचोदात्तालंकारश्चारुतांनीतइतितयोश्चतस्यचांगांगिभावसंकरः॥एवंविधविद्वद्गुरुवैभववर्णनस्यहेतुमतोराज्ञोवितरणविलासस्यहेतोश्चाभेदकथनंहेत्वलंकारःसचराज्ञोवितरण
विलासस्यानिरतिशयोत्कर्षोभिव्यक्तिपर्यवसायीएतावन्मात्रकविसंरंभश्चेदुक्तरूपोदात्तालंकारपरिष्कृतेहेत्वलंकारेविश्रांतिःवर्णनीयस्यराज्ञःकीदृशीसंपदितिप्रश्नोत्तरतयानिरतिशयैश्वर्यवितरणरूपाप्रस्तुतकार्यमुखेनतदीयसयंदृक्षैर्यप्रशंसनेकविसंरंभश्चेत्कार्यनिबंधनाप्रस्तुतप्रशंसालंकारेविश्रांतिः॥कार्यस्यापिवर्णनीयत्वेनप्रस्तुतत्वाभिप्रायेतुप्रस्तुतांकुरेविश्रांतिः॥अत्रविशेषानध्यवसायात्संदेहसंकरः॥किंचेहेदृग्वैभववर्णनस्यासंबंधसंबंधकथनरूपतयातिशयोक्तेरुदात्तालंकारेणसहैकवाचकानुप्रवेशसंकरः॥निरतिशयवितरणोत्कर्षपर्यवसायिनोहेत्वलंकारस्यायुष्टुतातथोदार्यवर्णनाभिरूपास्तुत्यासहैकवाचकानुप्रवेशसंकरः॥तन्मूलकस्याप्रस्तुतप्रशंसालंकारस्यप्रस्तुतांकुरस्यवाराजसंपत्समृद्धिवर्णनात्मकोदात्तालंकारेणसहैकवाचकानुप्रवेशसंकरः॥वाचकशब्दस्यप्रतिपादकमात्रपरतयाव्यंजकसाधारण्यदोषंचैत्यालंकवाचकानुप्रवेशसंकराणांसमप्राधान्यसंकरः॥नचैतेषांपरस्परमन्यत्रांगत्वमस्ति॥उदात्तादिमात्रस्यैवहेत्वलंकारादिवास्तुतायादकत्वेनातिशयोक्तिसंकरस्यांगतायाअनपेक्षणात्॥एवमन्यत्रापिकेचनतुर्णीमपिसंकराणांयथायोग्यसंकरः॥एवमन्यत्रापुदाहरणांतराण्यूह्यानि॥नन्वेतेषांहिविन्यासाभवंत्यतिशयात्मकाः॥कस्याप्यातिशयस्योक्तिरन्यत्रविचारणात्॥

कु.नं.

प्रायेणातिशयोक्तस्तनिन्नाइतिभावः॥एकजातीयरत्नानांनानासौवर्णेघटनेनानालंकारतालोकेप्रसिद्धेवमनीषिणां॥
अलंकारेषुबहुषुदधानेऽपिसाम्यंवैलक्षण्यंप्रतिव्यक्तिंप्रतिव्यक्तिमुरीक्षेव॥अलंकारप्रकारेषुयघनास्थामनीषिणां॥
स्वर्णादिरचितेनूत्नेनालंकारेनवशिल्पिना॥कथंनजायतेनास्थासुहृदांप्रतिभावतां॥अमुंकुवलयानंदमकरोदप्पदीक्षितः॥
नियोगाद्वेंकटपतेर्निरुपाधिकृपानिधेः॥चंद्रालोकोविजयतेशारदागमसंभवः॥हृद्यकुवलयानंदोयस्यप्रसादादहंदृश्यं॥
॥ ॥इतिश्रीमदद्वैतविद्याचार्यश्रीभरद्वाजकुलजलनिधिकौस्तुभश्रीरंगराजाध्वरींद्रवरसूनोरप्पदीक्षितस्यकृतिः
कुवलयानंदःसमाप्तः॥शुभमस्तु॥श्रीकृष्णार्पणमस्तु॥ ॥ ॥ ॥ ॥
श्री॥उपमा १अनन्वय २उपमेयोपमा ३प्रतीप ४रूपक ५परिणाम ६उल्लेख ७स्मृति ८भ्रांति ९संदेह १०अपह्नुति ११उ
त्प्रेक्षा १२अतिशयोक्ति १३तुल्ययोगिता १४दीपक १५आवृत्तिदीपक १६प्रतीपवस्तूपमा १७दृष्टांत १८निदर्शना १९व्यतिरे
क २०सहोक्ति २१विनोक्ति २२समासोक्ति २३परिकर २४परिकरांकुर २५श्लेष २६अप्रस्तुतप्रशंसा २७प्रस्तुतांकुर २८
पर्यायोक्त २९व्याजस्तुति ३०व्याजनिंदा ३१आक्षेप ३२विरोधाभास ३३विभावना ३४विशेषोक्ति ३५असंभव ३६

५९

कु०नं.

असंगति ३७विषम ३८सम ३९विचित्र ४०अधिक ४१अल्प ४२अन्योन्य ४३विशेष ४४व्याघात ४५
कारणमाला ४६एकावली ४७मालादीपक ४८सार ४९यथासंख्य ५०पर्याय ५१परिवृत्ति ५२परिसंख्या ५३
विकल्प ५४समुच्चय ५५कारकदीपक ५६समाधि ५७प्रत्यनीक ५८अर्थापत्ति ५९काव्यलिंग ६०अर्थांतरन्यास ६१
विकस्वर ६२प्रौढोक्ति ६३संभावन ६४मिथ्याध्यवसिति ६५ललित ६६प्रहर्षण ६७विषादन ६८उल्लास ६९अवहित्थ ७०
अनुज्ञा ७१लेश ७२मुद्रा ७३रत्नावली ७४तद्गुण ७५पूर्वरूप ७६अनुगुण ७७अनुगुण ७८मीलित ७९सामान्य ८०उन्मी
लित ८१विशेषक ८२उत्तर ८३सूक्ष्म ८४पिहित ८५व्याजोक्ति ८६गूढोक्ति ८७विवृतोक्ति ८८युक्ति ८९लोकोक्ति ९०छेको
क्ति ९१वक्रोक्ति ९२स्वभावोक्ति ९३भाविक ९४उदात्त ९५अत्युक्ति ९६निरुक्ति ९७प्रतिषेध ९८विधि ९९हेतु १०० रसवत् १०१
प्रेय १०२ऊर्जस्वि १०३समाहित १०४भावोदय १०५भावसंधि १०६भावशबलता १०७प्रत्यक्ष १०८अनुमान १०९उपमान ११०
शब्द १११अर्थापत्ति ११२संसृष्टि ११३अनुपलब्धि ११४संभव ११५ऐतिह्य ११६संसृष्टि ११७अंगांगिभावसंकर ११८समप्रा
धान्यसंकर ११९संदेहसंकर ११९एकवाचकानुप्रवेशसंकर १२०संकरसंकर १२१॥श्रीरस्तु

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥ कुवलयानंदसमाप्तः ॥

११५